पल्लवसङ्ख्या - ४०

समासः

- जि. महाबलेश्वर भट्टः

संस्कृतभारती
बेङ्गलूरु

संस्कृतभारती
'अक्षरम्', ८ उपमार्गः, २ घट्टः
गिरिनगरम्, बेङ्गलूरु - ५६० ०८५

प्रथमं मुद्रणम् - १९९४ - ५,०००
द्वितीयं मुद्रणम् - १९९७ - ५,०००
तृतीयं मुद्रणम् - १९९९ - ५,०००
चतुर्थं मुद्रणम् - २००१ - ५,०००
पञ्चमं मुद्रणम् - २००४ - ५,०००
षष्ठं मुद्रणम् - २००६ - ५,०००

मूल्यं - रू. २०.००

मुद्रणम् -
नन्दी प्रोसेस्
त्यागराजनगरम्, बेङ्गलूरु - २८

ISBN 81-88220-02-7

SAMASAH- A study book for Samasa prepared by Vidwan G. Mahabaleshwara Bhat. Publisher - **SAMSKRITA BHARATI** - 'Aksharam', 8th Cross, II Phase, Girinagar, Bangalore - 560 085.
Ph :2 6721052 / 26722576 Fax : 26722576 E-mail : samskritam@gmail.com

Pages - vi + 82 Price - Rs. 20.00 Sixth Print - November - 2006
Printed at - **Nandi Process,** T.R.Nagar, Bangalore - 560 028

प्रास्ताविकं किञ्चित्

(प्रथममुद्रणस्य)

छात्राणाम् अध्यापकानां च उपकारकं भवेत् इति धिया लिखितम् इदं समासपुस्तकम् । छात्राः तावत् प्रायः समासभेदान् तेषाम् उदाहरणानि च ज्ञातुम् इच्छन्ति । अध्यापकाः समासस्य लक्षणं, विग्रहस्य स्वरूपं, पूर्वोत्तरयोः पदयोः जायमानान् विकारान् च सङ्क्षेपेण अवगन्तुम् अभिलषन्ति । विषयस्य दार्ढ्यसम्पादनाय विभिन्नान् अभ्यासान् छात्राः विशेषेण वाञ्छन्ति । अतः एतादृशानाम् अपेक्षायाः अनुगुणम् इदं पुस्तकम् आरचितम् ।

समासो नाम कः ? को नाम विग्रहः ? समासभेदाः कति ? कानि च तेषाम् उदाहरणानि ? इत्येते अंशाः प्रथमे द्वितीये च प्रकरणे संक्षेपेण लिखिताः । टिप्पण्यः अपि क्वचित् आरचिताः । छात्राः एतत् प्रकरणद्वयं सावधानं पठित्वा समासस्य उदाहरणानि पुनः पुनः परिशील्य यदि स्मृतिपथे स्थापयन्ति तर्हि समासस्य विषये प्रायः क्लेशं न अनुभवेयुः ।

तृतीये प्रकरणे पूर्वोत्तरपदयोः विशेषाः निरूपिताः । लिङ्गानुसरणार्थम् अन्त-व्यवस्थानिर्णयार्थं च मार्गदर्शनमपि अत्र संक्षेपेण कृतमस्ति । अनन्तरप्रकरणे समासभेदानां विस्तरेण निरूपणं कृतम् ।

अस्मिन् पुस्तके विषयः पुनरुक्तः इव प्रतीयते । आदौ सङ्क्षेपेण निरूपणं, पश्चात् विस्तरेण कथनम् इति क्रमः यदा आश्रीयते तदा पुनरुक्तता अनिवार्या भवति । केचन अंशाः तु पुनः पुनः उक्ताः, ये अंशाः अवश्यं स्मरणीयाः भवेयुः ।

द्वितीयप्रकरणे समासभेदनिरूपणावसरे प्रसिद्धानि सूत्राणि लिखितानि । किन्तु तेषाम् अर्थः न उक्तः । चतुर्थे प्रकरणे विस्तरेण निरूपणसमये तु सूत्रतात्पर्यं लिखितम् । अधस्तात् सूत्राणि उल्लिखितानि । आवश्यकतायां सत्यां टिप्पणी तु विशेषतः लिखिता सर्वत्र । एतावता अपि समाससम्बन्धी सर्वोऽपि विषयः अत्र निरूपितः इति न । प्रायः प्रतिशतं सप्तत्यंशाः निरूपिताः स्युः ।

पुस्तके अस्मिन् अभ्यासपाठान् रचितवते श्री जनार्दनहेगडेमहोदयाय विशेषेण धन्यवादाः समर्प्यन्ते । कलाकारः, अक्षरसंयोजकः, मुद्रणालयाधिकारी, सर्वविधाः सहकारिणः चापि कृतज्ञतापूर्वकं स्मर्यन्ते ।

- लेखकः

भाव सं ।। श्रावणपूर्णिमा

२१.८.९४

(षष्ठमुद्रणस्य)

पुस्तकस्यास्य उपयोगयोग्यता बहुभिः विद्वद्भिः अध्यापकवर्यैः च बहुधा प्रशंसिता । इदानीं एतस्य षष्ठं मुद्रणं यत् प्रचलत् अस्ति तत् तु महते सन्तोषाय । सहकृतवन्तः सर्वे धन्यवादार्हाः ।

- प्रकाशकः

व्यय सं ।। कार्त्तिकपूर्णिमा

५.११.२००६

उपयोगार्थ सूचना

छात्राणां कृते
सर्वेषां कृते
'कः समासः इति कथं ज्ञातव्यम् ?' इति ज्ञातव्यं चेत्
४-५ पुटौ पश्यन्तु ।
'समासे कति भेदाः सन्ति ?' इति ज्ञातव्यं चेत्
६-१६ पुटं पश्यन्तु ।
'समस्तस्य पदस्य किं लिङ्गम् ?' इति ज्ञातव्यं चेत्
२८ पुटं पश्यन्तु ।
'समस्तस्य पदस्य किम् अन्तं स्यात् ?' इति ज्ञातव्यं चेत्
३०-३३ पुटान् पश्यन्तु ।
समासभेदाः विस्तरेण ज्ञातव्याः चेत्
३४-५८ पुटान् पश्यन्तु ।
'सुबन्तयोः योजनसमये का प्रक्रिया ?' इति ज्ञातव्यं चेत्
६४-६७ पुटान् पश्यन्तु ।
पूर्वोत्तरपदयोः विशेषनियमाः विस्तरेण ज्ञातव्याः चेत्
१७-२७ पुटान् पश्यन्तु ।
पूर्वपदे उत्तरपदे च स्मरणीयाः अंशाः सङ्ग्रहेण ज्ञातव्याः चेत्
२९-३३ पुटान् पश्यन्तु ।

अनुक्रमणिका

प्रथमं प्रकरणम्

१ . अथ समासः (उपक्रमः)

१ . १ . समासः

१. समसनं समासः । अनेकस्य पदस्य एकपदीभवनं समासः इत्यर्थः ।

यथा - *सीतायाः पतिः = सीतापतिः*

२. समासः सुबन्तानां भवति, [१]न तु तिङन्तानाम् ।

३. समासः युगपत् [२]द्वयोः द्वयोः सुबन्तयोः भवति । द्वन्द्वे तु युगपत् बहूनामपि ।

यथा - १. राजपुरुषागमनम् ।
राज्ञः पुरुषः = राजपुरुषः ।
राजपुरुषस्य आगमनम् = राजपुरुषागमनम् ।

२. हरिहरगुरवः ।
हरिश्च हरश्च गुरुश्च = हरिहरगुरवः ।

४. परस्परान्वितयोः सुबन्तयोः समासः भवति ।

यथा - राज्ञः पुत्रः = राजपुत्रः । अत्र द्वयोः परस्परान्वयः अस्ति ।

यत्र परस्परान्वयो नास्ति तत्र न समासः ।

यथा - 'भवति दर्शनं राज्ञः, पुत्रः चोरस्य धावति ।' अत्र राज्ञः दर्शने अन्वयः । पुत्रस्य चोरे अन्वयः । अतः अत्र राजशब्दस्य पुत्रशब्दस्य च परस्परान्वयाभावात् न समासः ।

---

१. क्वचित् तिङन्तयोः सुबन्त-तिङन्तयोश्च समासः श्रूयते । यथा - खादतमोदता, एहियवम् । किन्तु एतानि परिगणितानीति सर्वत्र कर्तुं न शक्यते ।

२. क्वचित् बहुव्रीहौ तत्पुरुषे च बहूनामपि सुबन्तानां युगपत् समासो भवति । यथा - रूपवती

५. समासे पूर्वत्र श्रूयमाणं पदं पूर्वपदमिति, उत्तरत्र श्रूयमाणं पदम् उत्तरपदमिति च व्यवह्रियते ।

यथा - चोरात् भयम् = चोरभयम् ।
अत्र 'चोर' इति पूर्वपदम् । 'भयम्' इति उत्तरपदम् ।

६. समासे जाते पूर्वपदम् उत्तरपदं च प्रातिपदिकरूपेण स्थितं भवति । ततः समस्तात् पदात् विभक्तिः योजनीया ।

यथा - शास्त्रे निपुणः = शास्त्र + ङि + निपुण + सु = शास्त्रनिपुण = शास्त्रनिपुणः

१.२. विग्रहः

वृत्त्यर्थावबोधकं वाक्यं विग्रहः । वृत्तिः = समासादिः । समासादेरर्थं बोधयितुं यद्वाक्यमुच्यते तद्वाक्यं 'विग्रहः' इति व्यवह्रियते ।

यथा - 'वृक्षमूलम्' इति समासः । 'वृक्षस्य मूलम्' इति विग्रहः ।

- विग्रहः द्विधा - १. स्वपदविग्रहः
२. अस्वपदविग्रहः* - इति ।

१. स्वपदविग्रहः -

समासस्यार्थः समासघटकैः पदैर्यदि वर्ण्यते तदा स्वपदविग्रहः । तथा च - 'समासघटकपदसहितं वाक्यं स्वपदविग्रहः' इत्यर्थः । (स्व(=समास)पदैः विग्रहः)

यथा - *ग्रामगतः इति समासः ।*
ग्रामं गतः इति स्वपदविग्रहः ।

---

* अलौकिकविग्रहोऽप्यस्ति । एषः प्रक्रियादशायाम् आश्रीयते ।
यथा - रमापतिः । अस्य समासस्य अलौकिकविग्रहः - रमा + ङस् + पति + सु इति ।

२. अस्वपदविग्रहः -

समासस्यार्थः समासघटकपदानि विहाय पदान्तरैर्यदि वर्ण्यते तदा अस्वपदविग्रहः । तथा च - 'समासघटकपदरहितं वाक्यम् अस्वपदविग्रहः' इत्यर्थः । (अत्र एकं पदं समासघटकमेव प्रायो भवति ।) नित्यसमासे अस्वपदविग्रहः क्रियते ।

यथा - उपकृष्णम् इति समासः ।
कृष्णस्य समीपम् इति अस्वपदविग्रहः ।
अत्र समीपमिति पदं न समासघटकं पदम् ।

- समासः द्विधा - १. केवलसमासः
२. विशेषसमासः - इति ।

१. केवलसमासः* -

तत्पुरुषादिसंज्ञाविनिर्मुक्तः समाससंज्ञामात्रयुक्तः केवलसमासः ।
यथा - पूर्वं भूतः = भूतपूर्वः

२. विशेषसमासः चतुर्धा - १. तत्पुरुषः २. बहुव्रीहिः
३. द्वन्द्वः ४. अव्ययीभावः चेति ।

१. **तत्पुरुषः** चतुर्धा - १. सामान्यः (७)
२. कर्मधारयः (९)
३. द्विगुः (३)
४. नञ्प्रभृतयः (५)

२. **बहुव्रीहिः** द्विधा - १. सामान्यः (६)
२. विशेषः (९)

---

* अस्य समासस्य विस्तरो नास्ति । अगतिकगतौ अयं केवलसमासः आश्रीयते । अयमेव 'सुप्सुपा समासः' इति व्याख्यानादिषु लिख्यते । 'सह सुपा' (२.१.४) इति सूत्रेण विहितः समासः इति तस्य तात्पर्यम् ।

३. **द्वन्द्वः** द्विधा - १. इतरेतरः (२)
२. समाहारः (२)

४. **अव्ययीभावः** प्रायः त्रयस्त्रिंशद्धा (३३)
प्रसिद्धाः (१२)

१.४. समासार्थः

समासे पूर्वपदम् उत्तरपदञ्च भवतः इत्युक्तम् । तत्र पूर्वपदस्य अपि अर्थः अस्ति । उत्तरपदस्य अपि अर्थः अस्ति । कदाचित् पूर्वपदार्थस्य, कदाचित् उत्तरपदार्थस्य, कदाचित् अन्यपदार्थस्य, कदाचित् उभयपदार्थस्य च प्राधान्यं भवति । *यस्य पदस्यार्थः प्रायः क्रियया अन्वितो भवति सोऽर्थः प्रधानमित्युच्यते ।

यथा - राजदूतो गच्छति । राज्ञः दूतः इति विग्रहः । 'राजन्' इति पूर्वपदम् । 'दूत' इति उत्तरपदम् । 'गच्छति' इति क्रियापदम् । गमनक्रियया 'दूत' इति उत्तरपदस्य अर्थः एव अन्वितः भवति, न तु पूर्वपदस्य राजपदस्य अर्थः । अतः 'राजसम्बन्धी दूतः गच्छति' इत्यर्थः सिद्धो भवति । एवञ्च अत्र दूतपदार्थः क्रियया अन्वितः इति दूतपदार्थः प्रधानम् ।

समस्ते पदे श्रुते को नाम अर्थोऽत्र प्रधानं स्यादिति सन्देहे, यत्किञ्चित्क्रियापदम् उच्चारणीयम् । ततः पूर्वोत्तरपदार्थयोः कतरः पदार्थः क्रियया अन्वितो भवतीति परिशील्य प्रधानाप्रधानयोर्निर्णयः कर्तव्यः ।

---

* 'राजदूतस्य पुत्रः गच्छति' इत्यादौ उत्तरपदार्थस्य दूतस्य पुत्रे एव अन्वयः, न तु गमनक्रियायाम् । अतः क्रियया अन्वितो भवति इति पङ्क्तिः कथं सङ्गच्छताम् ? सत्यम् । किन्तु यदा वाक्यात् पृथक्कृत्य समस्तपदं केवलं परिशीलयामः, तदा एवायमुपाय आश्रयणीय इत्यत्र तात्पर्यमिति मन्तव्यम् ।

१. प्रायः * उत्तरपदार्थप्रधानः तत्पुरुषः ।

उत्तरपदस्य अर्थः यदि क्रियया अन्वितो भवति तर्हि तत्पुरुषः इत्यर्थः ।
यथा - कर्मकुशलः ।
'कर्मकुशलम् आह्वयतु' इत्यत्र उत्तरपदस्य कुशलपदस्य अर्थः आह्वानक्रियया अन्वितो भवति, न तु पूर्वपदस्य अर्थः ।

२. प्रायः अन्यपदार्थप्रधानः बहुव्रीहिः ।

अन्यपदं = समासाघटकं पदम् । समासाघटकस्य पदस्य अर्थः यदि क्रियया अन्वितो भवति तर्हि बहुव्रीहिः इत्यर्थः ।

यथा - पीतं क्षीरं येन सः = पीतक्षीरः (बालः) ।

'पीतक्षीरः (बालः) गच्छति' इत्यत्र पीतपदस्य क्षीरपदस्य वा अर्थः गमनक्रियया अन्वितो न भवति । किन्तु समासाघटकस्य बालपदस्य (अन्यपदस्य) अर्थः अन्वितो भवति ।

३. प्रायः उभयपदार्थप्रधानः द्वन्द्वः ।

उभयोः पदार्थयोः यदि क्रियया अन्वयो भवति तर्हि द्वन्द्वः इत्यर्थः । उभयपदार्थप्रधानः इत्यस्य सर्वपदार्थप्रधान इत्यत्र तात्पर्यम् । तेन बहुपदद्वन्द्वेऽपि लक्षणसमन्वयो भवति ।

यथा - रामकृष्णौ
'रामकृष्णौ प्रविशतः' इत्यत्र प्रवेशनक्रियायाम् उभयोरपि पदार्थयोः अन्वयः भवति ।

४. प्रायः पूर्वपदार्थप्रधानः अव्ययीभावः ।

पूर्वपदस्य अर्थस्य प्राधान्ये अव्ययीभावः इत्यर्थः ।
यथा - उपवृक्षम् ।
वृक्षस्य समीपमिति विग्रहः । अत्र 'उप' इति पूर्वपदस्य सामीप्यार्थस्य प्राधान्यम् ।

---

* क्वचित् एतत् लक्षणं समन्वितं न भवति । एवमन्यानि त्रीणि अपि लक्षणानि । अतः सर्वत्र प्रायः इत्युक्तम् ।

२. सोदाहरणं समासभेदाः*

२.१. तत्पुरुषः

(प्रायः उत्तरपदार्थप्रधानः तत्पुरुषः)

२.१. तत्पुरुषः चतुर्धा - १. सामान्यः
२. कर्मधारयः
३. द्विगुः
४. नञ्प्रभृतयः इति ।

२.१.१. सामान्यः सप्तधा -

नाम[३]	*विग्रहः*	*समासः*
१. प्रथमातत्पुरुषः	अर्धं ग्रामस्य	अर्धग्रामः
२. द्वितीयातत्पुरुषः	गृहं गतः	गृहगतः
३. तृतीयातत्पुरुषः	नखैः भिन्नः	नखभिन्नः
४. चतुर्थीतत्पुरुषः	गवे हितम्	गोहितम्
५. पञ्चमीतत्पुरुषः	चोरात् भयम्	चोरभयम्
६. षष्ठीतत्पुरुषः	वृक्षस्य मूलम्	वृक्षमूलम्
७. सप्तमीतत्पुरुषः	कार्ये कुशलः	कार्यकुशलः

* समासभेदानां विस्तरः चतुर्थप्रकरणे (पृ ३४) द्रष्टव्यः ।

३. समासे श्रूयमाणं पूर्वपदं विग्रहावस्थायां यद्विभक्त्यन्तं भवति तद्विभक्तिनाम्ना व्यवहारः । यथा - ग्रामं गतः – ग्रामगतः । अयं द्वितीयातत्पुरुषः ।

२.१.२. कर्मधारयः [४]नवधा -

[तत्पुरुषः समानाधिकरणः कर्मधारयः - १.२.४२]

नाम[५]	विग्रहः	समासः
१. विशेषणपूर्वपदः	[६]नीलो मेघः	नीलमेघः
२. विशेषणोत्तरपदः	वैयाकरणः खसूचिः	वैयाकरणखसूचिः
३. विशेषणोभयपदः	शीतम् उष्णम्	शीतोष्णम्
४. उपमानपूर्वपदः*	मेघः इव श्यामः	मेघश्यामः
५. उपमानोत्तरपदः	नरः व्याघ्रः इव	नरव्याघ्रः
६. अवधारणापूर्वपदः	विद्या एव धनम्	विद्याधनम्
७. सम्भावनापूर्वपदः	आम्रः इति वृक्षः	आम्रवृक्षः
८. मध्यमपदलोपः	शाकप्रियः पार्थिवः	शाकपार्थिवः
९. मयूरव्यंसकादिः	अन्यो देशः	देशान्तरम्

---

४. समानविभक्त्यन्तयोरेव कर्मधारयः । अतः विग्रहवाक्ये पदद्वयमपि समानविभक्त्यन्तं (प्रथमाविभक्त्यन्तम्) भवति ।

५. कर्मधारयेऽपि अन्वर्थानि नामानि । यथा - विशेषणम् उत्तरपदं यस्य सः विशेषणोत्तरपदः कर्मधारयः । 'नीलमेघः' इत्यत्र 'नीलः' इति विशेषणं पूर्वपदञ्च । अतः 'नीलमेघः' इति विशेषणपूर्वपदः कर्मधारयः । एवमेव षट्सु भेदेषु ज्ञेयम् । मध्यमपदलोपः इत्यस्य विग्रहः मध्यमपदस्य लोपः यस्य सः इति । मयूरव्यंसकादिः इति गणस्य नाम । गणे बहवः शब्दाः सन्ति । तेषु प्रथमः शब्दः मयूरव्यंसकः । (व्यंसकः – धूर्तः) । इमानि नामानि पाणिनिना न विहितानि । छात्राणां बोधः सुकरो भवतु इति आधुनिकैः कृतानि ।

६. नीलः मेघः – नीलमेघः । नीलौ मेघौ – नीलमेघौ । नीलाः मेघाः – नीलमेघाः । इति त्रिषु वचनेष्वपि समासो भवति । एवं सर्वेषु समासेषु अर्थं दृष्ट्वा विग्रहः समासश्च वक्तव्यः इति ज्ञेयम् ।

* उपमानानि सामान्यवचनैरेव समस्यन्ते । उपमानोपमेययोः साधारणः धर्मः सामान्यम् । तद्विशिष्टोपमेयवचनैः समासः इत्यर्थः । 'मेघश्यामः' इत्यत्र श्यामशब्दः सामान्यवचनः । तेन 'मेघ इव रामः – मेघरामः' इति न भवति ।

२.१.३. द्विगुः त्रिधा -

[[७]तद्धितार्थोत्तरपदसमाहारे च - २.१.५१
संख्यापूर्वो द्विगुः - २.१.५२]

नाम	विग्रहः	समासः
१. समाहारद्विगुः[८]	त्रयाणां लोकानां समाहारः	त्रिलोकी
२. तद्धितार्थद्विगुः	षण्णां मातॄणाम् अपत्यम्	षाण्मातुरः[९]
३. उत्तरपदद्विगुः	पञ्च गावः धनं यस्य सः	पञ्चगवधनः[१०]

७. द्विगुसमासे पूर्वपदं सङ्ख्यावाचकम् एव भवति । किन्तु सङ्ख्यापूर्वः सर्वोऽपि न द्विगुः । यथा - पञ्च गावः यस्य सः पञ्चगुः इति बहुव्रीहिः । द्वौ च दश च - द्वादश इति द्वन्द्वः । अष्टाधिका विंशतिः - अष्टाविंशतिः इति कर्मधारयोऽप्यस्ति ।

८. सङ्ख्याविशेषणपूर्वपदकर्मधारयस्य स्थानेऽसंज्ञायामस्य प्रयोगः । सङ्ख्यापूर्वपद-कर्मधारयः संज्ञायामेव भवति । यथा - सप्त ऋषयः - सप्तर्षयः । सप्तर्षीणामियं संज्ञा । विशेषणपूर्वपदः कर्मधारयः अयम् । अनेकवद्भावी द्विगुः अयम् इति क्वचित् लिख्यते । तत् तु अपाणिनीयम् । तादृशद्विगोः असम्भवात् ।

९. षाण्मातुरः इति तद्धितान्तः शब्दः । तत्र षट्शब्दस्य मातृशब्दस्य चैव द्विगुसमासः । तद्धितप्रत्ययेन विना तद्धितार्थद्विगोः स्थितिः नास्ति ।

१०. 'पञ्चगवधनः' इति बहुव्रीहिः । पञ्चशब्द-गोशब्दयोरेव द्विगुसमासः । उत्तरपद - द्विगोरपि बहुव्रीहिं विना स्थितिः नास्ति ।

२.१.४. नञ्प्रभृतयः[११] पञ्च -

[नञ् - २.२.६,
कुगतिप्रादयः - २.२.१८,
उपपदमतिङ् - २.२.१९]

नाम	*विग्रहः*	*समासः*
१. नञ्समासः	न धर्मः	अधर्मः
२. कुसमासः	कुत्सितः पुरुषः	कुपुरुषः
३. गतिसमासः	अशुक्लं शुक्लं कृत्वा	शुक्लीकृत्य
४. प्रादिसमासः	१. प्रगतः आचार्यः २. अतिक्रान्तः देवम् ३. निष्क्रान्तः वाराणस्याः	प्राचार्यः अतिदेवः निर्वाराणसिः
५. उपपदसमासः	कुम्भं करोति इति[१२]	कुम्भकारः

११. 'कर्मधारयः नवधा' इत्युक्ते कर्मधारयस्यैव नव प्रभेदाः इत्यर्थः । किन्तु 'नञ्प्रभृतयः पञ्च' इत्युक्ते नञ्समासस्यैव पञ्च प्रभेदाः इति न मन्तव्यम् । अत एव प्रभृतिशब्दः प्रयुक्तः ।

१२. अत्र विग्रहे एव तिङन्तं श्रूयते, न तु समासे । अतः तिङन्तेन सह समासः इति न मन्तव्यम् ।

* * *

२.२. बहुव्रीहिः

[अन्यपदार्थप्रधानः बहुव्रीहिः]

२.२. बहुव्रीहिः द्विधा – १. सामान्यः
२. विशेषः इति ।

२.२.१. सामान्यः[१३] षोढा –

नाम	विग्रहः	समासः
१. द्वितीयार्थबहुव्रीहिः	प्राप्तम् उदकं यं सः	प्राप्तोदकः (ग्रामः)
२. तृतीयार्थबहुव्रीहिः	पीतं क्षीरं येन सः	पीतक्षीरः (बालः)
३. चतुर्थ्यर्थबहुव्रीहिः	दत्तः पशुः यस्मै सः	दत्तपशुः (रुद्रः)
४. पञ्चम्यर्थबहुव्रीहिः	उद्धृतं जलं यस्मात् सः	उद्धृतजलः (कूपः)
५. षष्ठ्यर्थबहुव्रीहिः	पीतम् अम्बरं यस्य सः	पीताम्बरः (हरिः)
६. सप्तम्यर्थबहुव्रीहिः	बहूनि फलानि यस्मिन् सः	बहुफलः (वृक्षः)

१३. समानाधिकरणबहुव्रीहिरेव सामान्यशब्देन अत्र व्यवहृतः । षट्स्वपि भेदेषु विग्रहे पदद्वयमपि प्रथमाविभक्त्यन्तं भवति । किन्तु अन्यपदार्थस्य बोधकं यद् इति पदं विग्रहे यादृशविभक्त्यन्तं भवति तद्विभक्त्यर्थनाम्ना व्यवहारः क्रियते । यथा - पीतम् अम्बरं यस्य सः – पीताम्बरः । पीतम् अम्बरञ्चेति विग्रहे पदद्वयमपि प्रथमान्तम् । अन्यपदार्थस्य बोधकं 'यद्' इति पदं षष्ठ्यन्तम् । अतः अयं षष्ठ्यर्थबहुव्रीहिः इत्युच्यते । बहुपदबहुव्रीहिः सामान्ये एव अन्तर्भवति ।

नाम	विग्रहः	समासः
१. व्यधिकरणः	चक्रं पाणौ यस्य सः	चक्रपाणिः
२. सङ्ख्योत्तरपदः	विंशतेः समीपे ये सन्ति ते	उपविंशाः
३. सङ्ख्योभयपदः	द्वौ वा त्रयो वा	द्वित्राः
४. सहपूर्वपदः	शिष्येण सह वर्तते इति	सशिष्यः
५. व्यतिहारलक्षणः	केशेषु केशेषु गृहीत्वा इदं युद्धं प्रवृत्तम्	केशाकेशि
६. दिगन्तराललक्षणः	दक्षिणस्याः पूर्वस्याः दिशो यदन्तरालम्	दक्षिणपूर्वा
७. नञ्बहुव्रीहिः[१४]	अविद्यमानः पुत्रः यस्य सः	अपुत्रः
८. प्रादिबहुव्रीहिः	निर्गता कृपा यस्मात् सः	निष्कृपः
९. उपमानपूर्वपदः	गजाननमिव आननं यस्य सः	गजाननः

---

१४. नञ्बहुव्रीहिः, प्रादिबहुव्रीहिः, उपमानपूर्वपदबहुव्रीहिश्च समानाधिकरण-बहुव्रीहौ एव अन्तर्भवन्ति । तत्तन्नाम्ना व्याख्यानादिषु व्यवह्रियते इति ज्ञापनार्थं केवलं विशेषे योजिताः ।

* * *

२.३. द्वन्द्वः

[उभयपदार्थप्रधानः द्वन्द्वः]

२.३. द्वन्द्वः द्विधा - १. इतरेतरः
२. समाहारः इति ।

२.३.१. इतरेतरः द्विधा –

नाम	विग्रहः	समासः
१. द्विपदद्वन्द्वः	रामश्च कृष्णश्च	रामकृष्णौ
२. बहुपदद्वन्द्वः	हरिश्च हरश्च गुरुश्च	हरिहरगुरवः

२.३.२. समाहारः द्विधा –

नाम	विग्रहः	समासः
१. [१५]समाहारः	संज्ञा च परिभाषा च अनयोः समाहारः	संज्ञापरिभाषम्
२. [१६]नित्यसमाहारः	पाणी च पादौ च एतेषां समाहारः	पाणिपादम्

---

१५. समाहारद्वन्द्वः सर्वत्र भवति । अतः घटपटम् इति, घटपटौ इति च भवति ।

१६. प्राणितूर्यसेनाङ्गानां समाहारः एव । इतरेतरः न भवति । 'पाणिपादाः' इति अपशब्दः एव ।

* * *

२.४. अव्ययीभावः

[पूर्वपदार्थप्रधानः अव्ययीभावः]

२.४. अव्ययीभावः [१७]प्रायः त्रयस्त्रिंशद्धा ।
(प्रसिद्धाः केचन भेदाः प्रदर्श्यन्ते ।)

नाम	*विग्रहः*	*समासः*
१. समीपार्थकः	कृष्णस्य समीपम्	उपकृष्णम्
२. अभावार्थकः	मक्षिकाणाम् अभावः	निर्मक्षिकम्
३. योग्यतार्थकः	रूपस्य योग्यम्	अनुरूपम्
४. वीप्सार्थकः	दिनं दिनं प्रति	प्रतिदिनम्
५. पदार्थानतिवृत्त्यर्थकः	शक्तिम् अनतिक्रम्य	यथाशक्ति
६. मर्यादार्थकः	आ मुक्तेः	आमुक्ति (संसारः)
७. अभिविध्यर्थकः	आ बालेभ्यः	आबालम् (हरिभक्तिः)
८. आभिमुख्यार्थकः	अग्निम् अभि	अभ्यग्नि
९. मात्रार्थकः	शाकस्य लेशः	शाकप्रति
१०. अवधारणार्थकः	यावन्तः श्लोकाः	यावच्छ्लोकम् (अच्युतप्रणामाः)
११. पारेशब्दयुक्तः	पारे समुद्रस्य	पारेसमुद्रम्
१२. मध्येशब्दयुक्तः	मध्ये गङ्गायाः	मध्येगङ्गम्

---

१७. अव्ययीभावस्य गणनायां सूक्ष्मः क्लेशः अस्ति । अतः प्रायः इत्युक्तम् ।

* * *

२.५. समासभेदसम्बद्धाः अन्ये केचन अंशाः

२.५.१. एकशेषः –

एकशेषः समासो न । कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपासु पञ्चसु वृत्तिषु एकशेषः अन्यतमः । अतः समासः यथा वृत्तिः तथैव एकशेषोऽपि पृथक् वृत्तिरेव । अयम् एकशेषः द्वन्द्वसमासस्य अपवादः । अतः एकशेषस्यापि उदाहरणानि प्रदर्श्यन्ते ।

यथा – १. माता च पिता च = पितरौ
२. भ्राता च स्वसा च = भ्रातरौ
३. पुत्रश्च दुहिता च = पुत्रौ
४. हंसश्च हंसी च = हंसौ
५. स च रामश्च = तौ
६. स च यश्च = यौ
७. भवन्तश्च भवत्यश्च = भवन्तः
८. यूयं च वयं च = वयम्
९. रामश्च रामश्च = रामौ

२.५.२. अलुक्समासः –

नायं पृथक् समासः । समासे कृते पूर्वोत्तरपदयोः विभक्त्योः लोपः भवतीति उक्तम् । क्वचित् पूर्वपदस्य विभक्तेः लोपः न भवति । तदा अलुक्समासः इति व्यवहारः ।

यथा – वनेचरः – अयम् उपपदसमासः ।
जनुषान्धः – अयं तृतीयातत्पुरुषः ।
आत्मनेपदम् – अयं चतुर्थीतत्पुरुषः ।
परस्मैपदम् – अयं चतुर्थीतत्पुरुषः ।
युधिष्ठिरः – अयं सप्तमीतत्पुरुषः ।
कण्ठेकालः – अयं व्यधिकरणबहुव्रीहिः ।
देवानांप्रियः – अयं षष्ठीतत्पुरुषः ।

२.५.३. नित्यसमासः -

अयमपि न पृथक् समासः । अव्ययीभावे 'अव्ययं विभक्ति ....' इत्यादिना सूत्रचतुष्टयेन विहितः अव्ययीभावः (आहत्य चतुर्विंशतिः अस्ति ।) नित्यसमासः । यत्र संज्ञादिषु समस्तपदेषु विग्रहस्यापेक्षया विशेषार्थस्य भानमस्ति तत्रापि नित्यसमास एव । अत एव नित्यसमासे अस्वपदविग्रहः । उपपदसमासादिषु यत्र अस्वपदविग्रहः प्रदर्श्यते तत्रापि नित्यसमासत्वम् एव ।

२.५.४ . असमर्थसमासः –

परस्परान्वितयोरेव सुबन्तयोः समासः । किन्तु ययोः समासः इष्टः तयोः द्वयोः अन्वयः न भवति चेदपि क्वचित् समासः भवति ।

यथा - अपुनर्गेयाः श्लोकाः । पुनः न गेयाः इति विग्रहः । अत्र नञ्शब्दस्य पुनः शब्दस्य च (अपुनः) समासः जातः । किन्तु नञः अन्वयः गेयपदेनैव, न तु पुनः शब्देन । तथापि समासः कृतः । अत एव एषःअसमर्थसमासः इत्युच्यते । एवमेव सूर्यं न पश्यन्ति इति = असूर्यम्पश्याः इत्यादावपि ।

विग्रहवाक्यावयवपदार्थेभ्यः परः = अन्यः योऽयं विशिष्टैकार्थः, तत्प्रतिपादिका वृत्तिः । प्रथमविगृहीतानां पदानां प्रत्येकम् अर्थवत्त्वेन, समुदायशक्त्या विशिष्टैकार्थप्रतिपादिका वृत्तिः इति फलितम् ।

वृत्तयः पञ्च ।

कृत्-तद्धित-समास-एकशेष-सनाद्यन्तधातुरूपाः पञ्च वृत्तयः ।

---

* वृत्तिज्ञानं क्वचिदपेक्षितं भवति इत्यतः वृत्तिः सङ्क्षेपेण निरूपिता अत्र ।

यथा -

नाम	विग्रहः	उदाहरणम्
१. कृद्वृत्तिः	पचति इति	पाचकः
२. तद्धितवृत्तिः	दशरथस्य अपत्यम्	दाशरथिः
३. समासवृत्तिः	राज्ञः पुरुषः	राजपुरुषः
४. एकशेषवृत्तिः	माता च पिता च	पितरौ
५. सनाद्यन्तधातुवृत्तिः	१. पठितुम् इच्छति	पिपठिषति
	२. पुत्रम् आत्मन इच्छति	पुत्रकाम्यति
	३. पुनः पुनः/ अतिशयेन वा नृत्यति	नरीनृत्यते
	....	....
	....	....
	....	....
	....	....

* * *

तृतीयं प्रकरणम्

३. पूर्वोत्तरपदयोः विशेषः

रमायाः पतिः = रमापतिः । अत्र विग्रहे 'रमायाः' इत्यत्र षष्ठीविभक्तिः, 'पतिः' इत्यत्र प्रथमाविभक्तिश्च श्रूयते । समासे कृते तयोः द्वयोरपि विभक्त्योः लोपः भवति । ततः समस्तात्पदात् पुनरपि प्रथमाविभक्तिः क्रियते इति प्रक्रियाक्रमः ।

यथा - रमा + ङस् + पति + स्
रमा + ङस् + पति + स्
रमा + पति
रमापति + स् = रमापतिः

३.१. पूर्वपदस्य नियमाः* द्विधा - १. सामान्याः
२. विशेषाः इति ।

३.१.१. सामान्याः –

सर्वेषु समासेषु एते सामान्यनियमाः सम्भवन्ति । समासे जाते पूर्वपदस्य विभक्तेः लोपे कृते तत् पदं **प्रातिपदिकरूपेण स्थितं** भवति । अतः समासे कृते पूर्वपदस्य **प्रातिपदिकं झटिति सदा स्मरणीयम्** । तदा इमे अंशाः स्मरणीयाः –

---

* पूर्वपदसम्बन्धिनः सर्वे नियमाः अत्र नोच्यन्ते । प्रतिशतं नवतिः नियमाः लिख्यन्ते ।

नाम	नियमः	उदाहरणम्	प्रक्रिया
१. सन्धिः	सन्धीनामवसरोऽस्ति चेत् सन्धिः करणीय एव ।	भगवतः अनुग्रहः = भगवदनुग्रहः ।	भगवत् + अनुग्रह = भगवद् + अनुग्रह = भगवदनुग्रहः ।
२.नकरास्य लोपः	नकारान्तं प्रातिपदिकं चेत् नकारस्य लोपः कर्तव्यः ।	राज्ञः + पुरुषः = राजपुरुञः	राजन् + पुरुष = राज + पुरुष = राजपुरुषः ।
३. नञः लोपः	नञ्समासे नकारस्य (न्) लोपः करणीयः ।	न + धर्मः = अधर्मः	न (न् + अ) + धर्म = अ + धर्म = अधर्मः
४. नुडागमः	नञ्समासे उत्तरपदं यदि स्वरादि भवति तर्हि नलोपे जाते अकारात्परे नुड्(न्)-आगमः करणीयः ।	न + ईश्वरः = अनीश्वरः	न (न् + अ) + ईश्वरः । = अ + ईश्वरः = अ + न् + ईश्वरः = अनीश्वरः

३.१.२. विशेषाः -

केषुचित् समासेष्वेव विशेषनियमाः सम्भवन्ति ।

नाम	नियमः	उदाहरणम्	प्रक्रिया
१. पुंवद्भावः	कर्मधारये समानाधिकरणबहुव्रीहौ च पूर्वपदं स्त्रीलिङ्गे विद्यमानं सत् भाषितपुंस्कमपि यदि भवति (उभयलिङ्गकं) तर्हि पुंल्लिङ्गवद्रूपं प्राप्नोति ।	i. कर्म — दीर्घा + रज्जुः = दीर्घरज्जुः । ii. बहु — स्थिता + प्रज्ञा यस्य सः = स्थितप्रज्ञः ।	दीर्घा + रज्जुः = दीर्घ + रज्जुः = दीर्घरज्जुः । स्थिता + प्रज्ञा = स्थित + प्रज्ञा = स्थितप्रज्ञः ।
२. महतः आत्वम्	कर्मधारये समानाधिकरणबहुव्रीहौ च महतः तकारस्य आकारः भवति ।	i. कर्म — महान् + देव = महादेवः । ii. बहु — महती सेना यस्य सः = महासेनः ।	महत् + देव = मह + आ + देव = महा + देव = महादेवः । महती + सेना = महत् + सेना (पुंवद्भावः) मह + आ + सेना महा + सेना = महासेनः ।
३. आनङ्	विद्यायोनिसम्बन्धिनाम् ऋदन्तानां द्वन्द्वे आनङ् (आ) भवति । पुत्रशब्दे परेऽपि भवति ।	माता च पिता च = मातापितरौ पिता च पुत्रश्च = पितापुत्रौ	मातृ + पितृ = माता + पितृ = मातापितरौ ।
४. दीर्घः	कर्मव्यतिहारबहुव्रीहौ स्वरान्तस्य पूर्वपदस्य दीर्घो भवति ।	मुष्ट्या मुष्ट्या प्रहृत्य इदं युद्धं प्रवृत्तम् = मुष्टीमुष्टि	मुष्टि + मुष्टि = मुष्टी + मुष्टि = मुष्टीमुष्टि

३.२. उत्तरपदस्य नियमाः

३.२. उत्तरपदस्य नियमाः[१] द्विधा – १. सामान्यः
२. विशेषाः इति ।

३.२.१. सामान्यः –

सर्वेषु समासेषु एषः नियमः सम्भवति । समासे जाते उत्तरपदस्य विभक्तेः लोपे कृते तत् पदं प्रातिपदिकरूपेण स्थितं भवति । ततः परे केचन प्रत्ययाः क्वचित् भवन्ति । ते समासान्तप्रत्ययाः इत्युच्यन्ते ।

शब्दः	*नियमः*	*प्रत्ययः*	*उदाहरणम्*
१. पथिन्शब्दः	पथिन् शब्दान्तस्य 'अ' इति प्रत्ययः भवति । [ऋक्पूरब्धूः पथामानक्षे - ५.४.७४]	अ	दीर्घः पन्थाः = दीर्घपथः रम्यः पन्थाः यस्य सः = रम्यपथः

३.२.२. विशेषाः -

उत्तरपदसम्बन्धिनः विशेषनियमाः बहवः एकैकं समासमधिकृत्यैव प्रवृत्ताः । अतः एकैकस्यापि समासस्य नियमाः पृथगेव लिख्यन्ते ।

---

१. प्रसिद्धाः नियमाः लिखिताः ।

३.२.२.१. (अ) तत्पुरुषस्य नियमाः –

शब्दः	नियमः	प्रत्ययः	उदाहरणम्
१. रात्रिशब्दः	सर्व-एकदेश-संख्यात-पुण्य-संख्या-अव्ययेभ्यः परः रात्रिशब्दः अच्प्रत्ययं प्राप्नोति । सर्वादिपूर्वकः रात्रिशब्दः अकारान्तः भवतीत्यर्थः ।[४] [एकदेशः = प्रथमातत्पुरुषे सम्भवनीयाः पूर्व - अपर - अधर - उत्तर - मध्य - पश्चिमादिशब्दाः] [[५]अहः - सर्वैकदेशसंख्यात - पुण्याच्च रात्रेः - ५.४.८७]	अच् (अ)	सर्वा रात्रिः = [२]सर्वरात्रः पूर्वं रात्रेः = पूर्वरात्रः । संख्याता रात्रिः = संख्यातरात्रः पुण्या रात्रिः = पुण्यरात्रः नवानां रात्रीणां समाहारः = नवरात्रम्[३] अतिक्रान्तः रात्रिम् = अतिरात्रः

२. समासे रात्रिशब्दः यदा अकारान्तः भवति तदा पुंल्लिङ्गः भवति । (रात्राह्नाहाः पुंसि - २.४.२९)

३. संख्यापूर्वं रात्रं क्लीबम् ।

४. शुभरात्रिः, शिवरात्रिः इत्यादौ अस्य नियमस्य अप्रसक्त्या रात्रिशब्दः इकारान्तः स्त्रीलिङ्गश्च ।

५. अहन् शब्दस्योदाहरणम् - अहोरात्र इति । अयं द्वन्द्वसमासः ।

२. राजन्-अहन्-सखिशब्दाः	राजन्शब्दः अहन्शब्दः सखिशब्दश्च तत्पुरुषान्ते श्रूयमाणाः टच्प्रत्ययं प्राप्नुवन्ति । त्रयोऽपि अकारान्ताः भवन्तीत्यर्थः । (राजाहःसखिभ्यष्टच् - ५.४.९१)	टच् (अ)	देवानां राजा = देवराजः सप्तानाम् अह्नां समाहारः = सप्ताहः* कृष्णस्य सखा = कृष्णसखः
३. गोशब्दः	तत्पुरुषान्ते श्रूयमाणः गोशब्दः टच्प्रत्ययं प्राप्नोति । पुंल्लिङ्गे अकारान्तः, स्त्रीलिङ्गे ईकारान्तः भवतीत्यर्थः । (गोरतद्धितलुकि - ५.४.९२)	टच् (अ)	उत्तमः गौः = उत्तमगवः श्रेष्ठा गौः = श्रेष्ठगवी
४. नौशब्दः	द्विगुसमासस्यान्ते अर्धशब्दाच्च परं श्रूयमाणः नौशब्दः टच्प्रत्ययं प्राप्नोति । नौशब्दः अकारान्तः भवतीत्यर्थः । (नावो द्विगोः - ५.४.९९ अर्धाच्च - ५.४.१००)	टच् (अ)	तिसृणां नावां समाहारः = त्रिनावम् अर्धं नावः = अर्धनावम्*

---

* टच्प्रत्ययान्तः अहन्शब्दः पुंल्लिङ्गः । (रात्राह्नाहाः पुंसि - २.४.२९)

* नपुंसकत्वं लोकात् ।

३.२.२.१. (आ) समासान्तप्रत्ययस्य अपवादाः (तत्पुरुषे)

१. सु-अति-शब्दौ	यदा पूजनार्थे सु - अति - शब्दौ भवतः ताभ्यां परः शब्दः समासान्तं प्रत्ययं न प्राप्नोति । (न पूजनात् - ५.४.६९)	शोभनः राजा = सुराजा अतिशयितः राजा = अतिराजा
२. किंशब्दः	कुत्सायां यः किंशब्दः तस्मात्परः शब्दोऽपि समासान्तप्रत्ययं न प्राप्नोति । (किमः क्षेपे - ५.४.७०)	कुत्सितः राजा = किंराजा कुत्सिता सखा = किंसखा कुत्सिता गौः = किंगौः
३. नञ्	नञ्पूर्वपदः तत्पुरुषः समासान्तप्रत्ययं न प्राप्नोति । पथिन्शब्दस्तु विकल्पेन । (नञस्तत्पुरुषात् - ५.४.७१ पथो विभाषा - ५.४.७२)	न राजा = अराजा न सखा = असखा न पन्थाः = अपन्थाः / अपथम्*

---

* अपथं नपुंसकम् - २.४.३०

३.२.२.२. बहुव्रीहेः नियमाः

१. धर्मशब्दः	धर्मशब्दान्तः बहुव्रीहिः अनिच्प्रत्ययं प्राप्नोति । बहुव्रीहौ धर्मशब्दः नकारान्तः भवतीत्यर्थः । (धर्मादनिच्केवलात् - ५.४.१२४)	अनिच् (अन्)	दृष्टः धर्मः येन सः = दृष्टधर्मा ।
२.........	व्यतिहारलक्षणः इच्प्रत्ययं प्राप्नोति । अव्ययं च भवति । (इच्कर्मव्यतिहारे - ५.४.१२७)	इच् (इ)	दण्डैः दण्डैः प्रहृत्य इदं युद्धं प्रवृत्तं = दण्डादण्डि
३.धनुःशब्दः	धनुःशब्दान्तः बहुव्रीहिः अनङ् -आदेशं प्राप्नोति । धनुःशब्दः नकारान्तः भवति इत्यर्थः । (धनुषश्च - ५.४.१३२)	अनङ् (अन्)	गाण्डीवं धनुः यस्य सः = गाण्डीवधन्वा ।
४.जायाशब्दः	जायाशब्दान्तः बहुव्रीहिः निङ्-आदेशं प्राप्नोति । (जायाया निङ् - ५.४.१३४)	निङ् (नि)	कौसल्या जाया यस्य सः = कौसल्याजानिः
५.गन्धशब्दः	i) उत्-पूति-सु-सुरभिशब्देभ्यः परः गन्धशब्दः 'इत्' इत्यादेशं प्राप्नोति । (गन्धस्येदुत्पूतिसुसुरभिभ्यः - ५.४.१३५ ii) अल्पार्थे विद्यमानः गन्धशब्दः बहुव्रीहौ 'इत्' इत्यादेशं प्राप्नोति । (अल्पाख्यायाम् - ५.४.१३६) iii) उपमानात्परः गन्धशब्दोऽपि 'इत्' इत्यादेशं प्राप्नोति । (उपमानाच्च - ५.४.१३७)	इत् (इ)	उद्गतः गन्धः यस्य सः = उद्गन्धिः पूतिः गन्धः यस्य सः = पूतिगन्धिः शोभन गन्धः यस्य सः = सुगन्धिः सुरभिः गन्धः यस्य सः = सुरभिगन्धिः घृतस्य गन्धः (लेशः) यस्मिन् तत् = घृतगन्धि (भोजनम्) । मत्स्यगन्ध इव गन्धः यस्याः सा = मत्स्यगन्धिः ।

६. पादशब्दः	संख्यापूर्वस्य सुपूर्वस्य च पादशब्दस्य अकारस्य लोपः भवति । (संख्यासुपूर्वस्य - ५.४.१४०)		द्वौ पादौ यस्य सः =द्विपाद् शोभनौ पादौ यस्य सः = सुपाद् ।
७. ईकारान्तः ऊकारान्तः ऋकारान्तः च शब्दः	ईकारान्तस्त्रीलिङ्गः ऊकारान्तस्त्रीलिङ्गः ऋकारान्तश्च शब्दः बहुव्रीहौ अन्ते श्रूयमाणः 'कप्'प्रत्ययं प्राप्नोति । (नद्यृतश्च - ५.४.१५३)	कप् (क)	तीर्णा नदी येन सः = तीर्णनदीकः दृष्टा वधूः येन सः = दृष्टवधूकः नदी माता यस्य सः = नदीमातृकः (देशः) ।
८.शिष्टाः शब्दाः	पूर्वोक्तेभ्यः* शब्देभ्यः भिन्नाः शब्दाः समानाधिकरणबहुव्रीहौ अन्ते श्रूयमाणाः विकल्पेन कप्प्रत्ययं प्राप्नुवन्ति । (शेषाद्विभाषा - ५.४.१५४)		कठोरं चेतः यस्य सः = कठोरचेतस्कः/ कठोरचेताः
९. आकारान्तः गोश्ब्दश्च	आकारान्तस्त्रीलिङ्गः शब्दः गोशब्दश्च बहुव्रीहौ अन्ते श्रूयमाणः ह्रस्वः भवति । कप्प्रत्यये परे तु आकारान्तः स्त्रीलिङ्गः विकल्पेन ह्रस्वो भवति । (गोस्त्रियोरुपसर्जनस्य - १.२.४८ आपोऽन्यतरस्याम् - ७.४.१५)		अधीता विद्या येन सः = अधीतविद्यः/ अधीतविद्यकः / अधीतविद्याकः । चित्राः गावः यस्य सः = चित्रगुः (गोपः) ।

* पूर्वोक्ताः = बहुव्रीहौ बहुभ्यः शब्देभ्यः समासान्तप्रत्ययाः विहिताः । सर्वसमाससाधारणप्रत्यया अपि केभ्यश्चित् विहिताः । ते शब्दाः पूर्वोक्तशब्देन ग्राह्याः । न तु अत्र पूर्वोक्ता एव ।

३.२.२.३. द्वन्द्वसमासस्य नियमः

शब्दः	*नियमः*	*प्रत्ययः*	*उदाहरणम्*
१. चवर्गाद्यन्तः	समाहारद्वन्द्वे अन्ते श्रूयमाणाः चवर्गान्तः दकारान्तः षकारान्तः हकारान्तश्च 'टच्'प्रत्ययं प्राप्नुवन्ति । [द्वन्द्वाच्चुदष - हान्तात्समाहारे - ५-४-१०६]	टच् (अ)	वाक् च त्वक् च अनयोः समाहारः = वाक्त्वचम् । क्षत्रियाश्च वणिजश्च एतेषां समाहारः = क्षत्रियवणिजम् सम्पच्च विपच्च अनयोः समाहारः = सम्पद्विपदम् । वाक् च त्विट् च अनयोः समाहारः = वाक्त्विषम् छत्रं च उपानत् च अनयोः समाहरः = छत्रोपानहम् ।

३.२.२.४. अव्ययीभावस्य नियमाः

नियमः	*प्रत्ययः*	*उदाहरणम्*
१. अव्ययीभावे अन्ते श्रूयमाणः - i) अकारान्तः आकारान्तो वा शब्दः अकारान्तनपुंसकस्य एकवचनमिव ।		- कृष्णस्य समीपम् = उपकृष्णम् । - शालायाः समीपम् = उपशालम् ।

नियमः	प्रत्ययः	उदाहरणम्
ii) इकारान्तः ईकारान्तो वा शब्दः वारिशब्दस्य एकवचनमिव ।		शक्तिम् अनतिक्रम्य = यथाशक्ति । आ कन्याकुमार्याः = आकन्याकुमारि ।
iii) उकारान्तः, ऊकारान्तः, ओकारान्तः, औकारान्तः वा शब्दः मधुशब्दस्य एकवचनमिव ।		वस्तूनाम् अभावः = निर्वस्तु । वधूं वधूं प्रति = प्रतिवधु । गोः समीपम् = उपगु*।
iv) ऋकारान्तशब्दः ऋकारान्तनपुंसकस्य एकवचनमिव । सर्वोऽपि अव्ययीभावः अव्ययं भवति ।		कार्यकर्तारं कार्यकर्तारं प्रति = प्रतिकार्यकर्तृ ।
२. अव्ययीभावे अन्ते श्रूयमाणः अन्नन्तः टच्प्रत्ययं प्राप्नोति । नपुंसकं चेत् विकल्पेन । टच् प्रत्ययान्तोऽयमन्नन्तः अकारान्तनपुंसकस्य एकवचनमिव भवति इति फलितं भवति ।	(टच्) अ	आत्मनि इति = अध्यात्मम् कर्माणि अनतिक्रम्य = यथाकर्मम् / यथाकर्म

* आयतीगवम् इत्येकं निपातनाद् अकारान्तम् ।

३.३. लिङ्गानुसरणम् *

नियमः	*उदाहरणम्*
१. इतरेतरद्वन्द्वस्य तत्पुरुषस्य च उत्तरपदस्य यल्लिङ्गं तद्भवति । [परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः - २.४.२६]	- वृषभश्च महिषी च = वृषभमहिष्यौ । - अर्धं विरामस्य = अर्धविरामः ।
२. समाहारद्वन्द्वः द्विगुश्च नपुंसकं भवति । [स नपुंसकम् - २.४.१७]	- पाणी च पादौ च एतेषां समाहारः = पाणिपादम् । - पञ्चानां गवां समाहारः = पञ्चगवम्
३. अकारान्तोत्तरपदः द्विगुः स्त्रीलिङ्गः ईकारान्तश्च भवति । [**पञ्चपात्रं, त्रिभुवनम्, चतुर्युगमित्यत्र नायं नियमः।]	- त्रयाणां लोकानां समाहारः = त्रिलोकी
४. बहुव्रीहिः त्रिलिङ्गकः भवति ।	- प्राप्तम् उदकं यं सः = प्राप्तोदकः (ग्रामः) - प्राप्तम् उदकं यां सा = प्राप्तोदका (नगरी) । - प्राप्तम् उदकं यत् तत् = प्राप्तोदकम् (नगरम्) ।
५. अव्ययीभावः सर्वोऽपि अव्ययं भवति ।	- शक्तिम् अनतिक्रम्य = यथाशक्ति ।

* प्रमुखाः नियमाः लिखिताः । अन्ये नियमाः अपि सन्ति । अपवादाः अपि सन्ति ।

** ४५ - पृष्ठं पश्यन्तु ।

३.४. एष सङ्ग्रहः*

३.४.१. पूर्वपदे स्मरणीयाः

३.४.१.१. सामान्यनियमाः -

स्मरणीयः अंशः	*उदाहरणम्*
१. सन्धिः	भगवदनुग्रहः
२. नकारलोपः	राजपुरुषः
३.नञः नलोपः	अधर्मः
४. नुडागमः	अनीश्वरः

३.४.१.२. विशेषनियमाः -

स्मरणीयः अंशः	*समासनाम*	*उदाहरणम्*
१. पुंवद्भावः	कर्मधारयः	दीर्घरज्जुः
	समानाधिकरणबहुव्रीहिः च	स्थितप्रज्ञः
२. महतः आत्वम्	कर्मधारयः	महादेवः
	समानाधिकरणबहुव्रीहिः च	महासेनः
३. आनङ्	द्वन्द्वः	मातापितरौ
		पितापुत्रौ
४. दीर्घः	कर्मव्यतिहारबहुव्रीहिः	मष्टीमुष्टि

* सप्तदशपृष्ठतः अष्टाविंशतिपृष्ठपर्यन्तं ये अंशाः उक्ताः ते अत्र संक्षेपेण स्मरणार्थं पुनः लिखिताः ।

३.४.२. उत्तरपदे स्मरणीयाः

३.४.२.१. सामान्यनियमाः

	प्रत्ययः	अन्तः	समासः	उदाहरणम्
१. पथिन्	अ	अकारान्तः	कर्मधारयः	दीर्घपथः
	,,	,,	बहुव्रीहिः	रम्यपथः
	,,	,,	द्वन्द्वः	तीरपथौ
	,,	,,	नञ्तत्पुरुषः	अपथम्
	–	नकारान्तः	नञ्तत्पुरुषः	अपन्थाः

३.४.२.२. विशेषनियमाः

३.४.२.२. (अ) तत्पुरुषः

	प्रत्ययः	अन्तः	लिङ्गम्	उदाहरणम्
१. रात्रि	अच् (अ)	अकारान्तः	पुंल्लिङ्गः	सर्वरात्रः
	,,	,,	,,	पूर्वरात्रः
	,,	,,	,,	अपररात्रः
	,,	,,	,,	अर्धरात्रः
	,,	,,	,,	उत्तररात्रः
	,,	,,	,,	मध्यरात्रः
	,,	,,	,,	पश्चिमरात्रः
	,,	,,	,,	संख्यातरात्रः
	,,	,,	,,	पुण्यरात्रः
	,,	,,	,,	अतिरात्रः
	,,	,,	नपुंसकलिङ्गः	नवरात्रम्

	प्रत्ययः	अन्तः	लिङ्गम्	उदाहरणम्
२. राजन्	टच् (अ)	अकारान्तः	पुंल्लिङ्गः	देवराजः
,,	टच्	ईकारान्तः	स्त्रीलिङ्गः	अतिराजी
अहन्	टच्	अकारान्तः	पुंल्लिङ्गः	सप्ताहः
सखि	,,	,,	,,	कृष्णसखः
,,	,,	ईकारान्तः	स्त्रीलिङ्गः	अतिसखी
३. नौ	,,	अकारान्तः	नपुंसकलिङ्गः	त्रिनावम्
,,	,,	,,	,,	अर्धनावम्
[यदा पूर्वत्र एते भवन्ति तदा समासान्त-प्रत्ययाः न भवन्ति ।] ↓				
४. सु	—	नकारान्तः	पुंल्लिङ्गः	सुराजा
,,		इकारान्तः	,,	सुसखा
अति		नकारान्तः	,,	अतिराजा
,,		इकारान्तः	,,	अतिसखा
५. किम्	—	नकारान्तः	,,	किंराजा
,,		इकारान्तः	,,	किंसखा
,,		ओकारान्तः	स्त्रीलिङ्गः/ पुंल्लिङ्गः	किंगौः
६. नञ्	—	नकारान्तः	पुंल्लिङ्गः	अराजा
,,		इकारान्तः	,,	असखा
,,		नकारान्तः	,,	अपन्थाः
,,	अप्	अकारान्तः	नपुंसकलिङ्गः	अपथम्

३.४.२.२. (आ) बहुव्रीहिः

शब्दः	प्रत्ययः	अन्तः	उदाहरणम्
१. धर्म	अनिच् (अन्)	नकारान्तः	दृष्टधर्मा
२.	इच् (इ)	इकारान्तः	दण्डादण्डि
३. धनुस्	अनङ् (अन्)	नकारान्तः	गाण्डीवधन्वा
४. जाया	निङ् (नि)	इकारान्तः	कौसल्याजानिः
५. गन्धः	इत् (इ)	इकारान्तः	उद्गन्धिः
,,	,,	,,	सुगन्धिः
,,	,,	,,	सुरभिगन्धिः
,,	,,	,,	घृतगन्धिः
,,	,,	,,	मत्स्यगन्धिः
६. पादः	(लोपः)	दकारान्तः	द्विपाद्
,,	,,	,,	सुपाद्
७. ईकारान्तः	कप् (क)	अकारान्तः	तीर्णनदीकः
ऊकारान्तः	,,	,,	दृष्टवधूकः
ऋकारान्तः	,,	,,	नदीमातृकः
८. शिष्टाः	कप् (क)	अकारान्तः	कठोरचेतस्कः
	(विकल्पेन)	तत्तदन्तः	कठोरचेताः
९. आकारान्तः	ह्रस्वः	अकारान्तः	अधीतविद्यः
	कप् ह्रस्वः च	,,	अधीतविद्यकः
	(विकल्पेन ह्रस्वः)	,,	अधीतविद्याकः
१०. गो	ह्रस्वः	उकारान्तः	चित्रगुः

३.४.२.२. (इ) द्वन्द्वः

शब्दः	प्रत्ययः	अन्तः	लिङ्गम्	उदाहरणम्
१. चवर्गान्तः	टच्	अकारान्तः	नपुंसकलिङ्गः	वाक्त्वचम्
दकारान्तः	,,	,,	,,	सम्पद्विपदम्
षकारान्तः	,,	,,	,,	वाक्त्विषम्
हकारान्तः	,,	,,	,,	छत्रोपानहम्

३.४.२.२. (ई) अव्ययीभावः

शब्दः	प्रत्ययः	अन्तः	लिङ्गम्	उदाहरणम्
अकारान्तः	—	अकारान्तः	नपुंसकलिङ्गः	उपकृष्णम्
आकारान्तः	—	,,	अव्ययं वा	उपशालम्
इकारान्तः	—	इकारान्तः	,,	यथाशक्ति
ईकारान्तः	—	,,	,,	आकन्याकुमारि
उकारान्तः	—	उकारान्तः	,,	निर्वस्तु
ऊकारान्तः	—	,,	,,	प्रतिवधु
ओकारान्तः	—	,,	,,	उपगु
ऋकारान्तः	—	ऋकारान्तः	,,	प्रतिकार्यकर्तृ
अन्नन्तः	टच् (अ)	अकारान्तः	,,	अध्यात्मम्

* * *

४. समासभेदविस्तरः

सोदाहरणं समासभेदाः द्वितीयप्रकरणे निरूपिताः । एकैकस्य भेदस्य एकैकम् उदाहरणं प्रदर्शितम् । आदर्शभूतानि तानि उदाहरणानि मनसि निधायैव बहुत्र समासं निश्चेतुं प्रभवामः । तथापि समासे प्राधान्येन अंशद्वयं ज्ञातव्यं भवति । तथा हि -

१. क्वचित् परिगणितैरेव शब्दैः समासो भवति ।

यथा – [a]चोरात् भयम् = चोरभयम् । [b]वनं प्राप्तः = वनप्राप्तः इति भवति । किन्तु चोरात् रक्षणम् = चोररक्षणम् इति, वनं प्राप्तवान् = वनप्राप्तवान् इति वा समासः उक्तार्थे न भवति ।

२. पूर्वपदव्यवस्था[c] –

यथा – प्रथमः पुरुषः इति पुरुषः प्रथमः इति वा विग्रहे कृतेऽपि समासे प्रथमपुरुष इत्येव भवति, न तु पुरुषप्रथम इति ।

एवम् अन्येऽपि सूक्ष्मांशाः ज्ञातव्याः भवन्ति । **अतः द्वितीयप्रकरणे उक्तानां भेदानामेव विस्तरेण निरूपणम् अत्र क्रियते ।** तावतापि सर्वोऽपि समासविषयः उक्तो न भवति । प्रधानविषयाः केवलं निरूपिताः भवन्ति ।

४.१.१. तत्पुरुषः

४.१.१.१. प्रथमातत्पुरुषः

१. पूर्व–अपर–अधर–उत्तर–शब्दाः समांशवाची अर्धशब्दश्च अवयविवाचक–सुबन्तेन समस्यन्ते । किन्तु अवयवी एकत्वसंख्याविशिष्टो भवेत् ।

[d]पूर्वं कायस्य = पूर्वकायः[e] अपरं गृहस्य = अपरगृहम्,

a. ७ - पृष्ठं पश्यन्तु । b. ७ - पृष्ठं पश्यन्तु । c. ६२ - पृष्ठं पश्यन्तु । d. पूर्वापराधरोत्तरम् एकदेशिनैकाधिकरणे - २.२.१, e. पूर्वः छात्राणां = पूर्वच्छात्रा इति न भवति । अवयवी एकवचनान्तो भवेदिति उक्तत्वात् ।

अधरं भवनस्य = अधरभवनम्, उत्तरं रात्रे = उत्तररात्रः[g]
[f]अर्धं पिप्पल्याः = अर्धपिप्पली

२. सर्वोऽप्येकदेशवाचकः शब्दः कालवाचकेन शब्देन समस्यते ।

[h]मध्यम् अह्नः = मध्याह्नः । [h]सायम् अह्नः = सायाह्नः
[h]पूर्वम् अह्नः = पूर्वाह्णः [h]अपरम् अह्नः = अपराह्णः,
मध्यं रात्रेः = मध्यरात्रः[g] पश्चिमं रात्रेः = पश्चिमरात्रः[g]

४.१.१.२. द्वितीयातत्पुरुषः

द्वितीयाविभक्त्यन्तं[२] सुबन्तं, श्रित-अतीत-पतित-गत-अत्यस्त-प्राप्त-आपन्न-[३]गमि-गमि-बुभुक्षु-शब्दैः समस्यते ।

कृष्णं श्रितः = कृष्णश्रितः, शालां प्राप्तः = शालाप्राप्तः,
दुःखम् अतीतः = दुःखातीतः संशयम् आपन्नः = संशयापन्नः
कूपं पतितः = कूपपतितः ग्रामं गमी = ग्रामगमी,
ग्रामं गतः = ग्रामगतः, नगरं गामी = नगरगामी,
मार्गम् अत्यस्तः = मार्गात्यस्तः अन्नं बुभुक्षुः = अन्नबुभुक्षुः

एतेषु उत्तरपदं श्रितादिषु दशसु अन्यतमं भवेत्, नान्यत् । अत एव अन्नं भुक्तवान् = अन्नभुक्तवान् इति समासो न भवति ।

४.१.१.३. तृतीयातत्पुरुषः

१. तृतीयाविभक्त्यन्तं[४] सुबन्तं, पूर्व-सदृश-सम-ऊनार्थ-कलह-निपुण-मिश्र-[५]संमिश्र-श्लक्ष्ण-अवर[६]-शब्दैः समस्यते । (ऊनार्थः = ऊनार्थ-बोधकानि पर्यायपदानि ।)

---

f. ग्रामार्धः इति तु षष्ठीतत्पुरुषः । अतः ग्रामस्य अर्ध इति पुंल्लिङ्गेनार्धशब्देन विग्रहो वक्तव्यः । g. २१- पृष्ठं पश्यन्तु । h. प्रथमातत्पुरुषे 'अहन्'शब्दः यद्युत्तरपदं भवति तदा अहन्शब्दस्य स्थाने 'अह्न' इत्यादेशः भवति ।,
२. द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः - २.१.२४,
३. गम्यादीनाम् उपसंख्यानम् (वा),
४. पूर्वसदृशसमोनार्थकलहनिपुणमिश्रश्लक्ष्णैः -२.१.३१,
५. मिश्रग्रहणे सोपसर्गस्यापि ग्रहणम् । 'सम्मिश्र' इति प्रयोगप्राचुर्यात् उपात्तम् । सति प्रयोगे उपसर्गान्तरेण युक्तस्यापि ग्रहणं कर्तव्यम् ।
६. अवरस्योपसंख्यानम् (वा) ।

मासेन पूर्वः = मासपूर्वः आचारेण निपुणः = आचारनिपुणः
मात्रा सदृशः = मातृसदृशः, गुडेन मिश्रः = गुडमिश्रः,
पित्रा समः = पितृसमः, गुडेन संमिश्रः, = गुडसंमिश्रः,
माषेण ऊनम् = माषोनम्, आचारेण श्लक्ष्णः = आचारश्लक्ष्णः,
माषेण विकलम् = माषविकलम्, मासेन अवरः = मासावरः,
वाचा कलहः = वाक्कलहः

२. तृतीयाविभक्त्यन्तं[७] कृदन्तेन प्रायः समस्यते (तृतीयाविभक्त्यन्तं = कर्तृ-तृतीयान्तं (हरिणा त्रातः) करणतृतीयान्तं (नखैः भिन्नः) वा भवेत्।)

हरिणा त्रातः = हरित्रातः नखैः भिन्नः = नखभिन्नः
तेन कृतम् = तत्कृतम् खड्गेन छिन्नः = खड्गच्छिन्नः
कालिदासेन रचितम् = कालिदासरचितम्
परशुना विच्छिन्नः = परशुविच्छिन्नः

प्रायः इति कथनात् दण्डेन ताडितवान् = दण्डताडितवान् इति समासो न भवति।

३. संस्कारद्रव्यं[८] दध्यादि अन्नवाचिना, [९]मिश्रीकरणं गुडादि च भक्ष्यवाचिना समस्यते।

दध्ना ओदनः = दध्योदनः गुडेन पृथुकाः = गुडपृथुकाः
क्षीरेण ओदनः = क्षीरोदनः गुडेन धानाः = गुडधानाः
(धानाः = भ्रष्टयवाः)

४.१.१.४. चतुर्थीतत्पुरुषः

चतुर्थीविभक्त्यन्तं[१०] तदर्थ-अर्थ-बलि-हित-सुख-रक्षितशब्दैः समस्यते।

[i] *तदर्थः = चतुर्थ्यन्तवाच्याय यत् तत्। प्रकृतिविकृतिभावे एव अयं (तादर्थ्येन) समासः। यथा - कुण्डलाय हिरण्यम्। चतुर्थ्यन्तवाच्यं*

---

७. कर्तृकरणे कृता बहुलम् - २.१.३२,
८. अन्नेन व्यञ्जनम् - २.१.३४
९. भक्ष्येण मिश्रीकरणम् - २.१.३५,
१०. चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः - २.१.३६

कुण्डलम् । तस्मै कुण्डलाय यत्तत् हिरण्यम् । अत्र हिरण्यं प्रकृतिः । कुण्डलं विकृतिः ।

ii) *अर्थः = अर्थशब्देन*[११] *चतुर्थ्यन्तं नित्यं समस्यते । विशेष्यस्य यल्लिङ्गं तल्लिङ्गं च भवति । नित्यसमासत्वात् विग्रहवाक्ये अर्थ-शब्दस्य श्रवणं न भवति । यथा- द्विजाय अयम् = द्विजार्थः (सूपः)]*

यूपाय दारु = यूपदारु
भूतेभ्यो बलिः = भूतबलिः
कुण्डलाय हिरण्यम् = कुण्डलहिरण्यम्
गवे हितम् = गोहितम्
द्विजाय अयम् = द्विजार्थः (सूपः)
गवे सुखम् = गोसुखम्
छात्राय इयम् = छात्रार्था (यवागूः)
गवे रक्षितम् = गोरक्षितम्
शिशवे इदम् = शिश्वर्थम् (पयः)

अर्थादीन् पञ्च शब्दान् विहाय चतुर्थ्यन्तम् अन्येन केनाऽपि पदेन न समस्यते । (प्रकृतिविकृतिभावे तु तदर्थसमासो भवति । तादृशानि विरलानि एव उदाहरणानि ।) अतः गुरुदक्षिणा इत्यादौ गुरवे दक्षिणा इति न विग्रहः । किन्तु गुरोः दक्षिणा इत्येव विग्रहः ।

४.१.१.५. पञ्चमीतत्पुरुषः

i) पञ्चमीविभक्त्यन्तं [१२]भय-भीत-भीति-भी[१३] - शब्दैः समस्यते ।

चोराद् भयम् = चोरभयम्
वृकात् भीतिः = वृकभीतिः
व्याघ्राद् भीतः = व्याघ्रभीतः
वृश्चिकात् भीः = वृश्चिकभीः

एतेष्वपि उत्तरपदं, भयादिषु अन्यतमं भवेत्, नान्यत् । अतः चोराद् रक्षितः = चोररक्षितः, व्याघ्रात् त्रातः = व्याघ्रत्रातः इति समासो न भवति । ग्रामात् निर्गतः = ग्रामनिर्गतः, अधर्माद् जुगुप्सुः = अधर्मजुगुप्सुः इति समासो भवतीति भाष्यकारः ।

---

११. अर्थेन नित्यसमासो विशेष्यलिङ्गता चेति वक्तव्यम् । (वा)

१२. पञ्चमी भयेन - २.१.३७ ।

१३. भयभीतभीतिभीभिरिति वाच्यम् । (वा)

ii) कतिपयान्येव पञ्चम्यन्तानि[१४] अपेत-अपोढ-मुक्त-पतित-अपत्रस्तशब्दैः समस्यन्ते ।

सुखाद् अपेतः = सुखापेतः　　स्वर्गात् पतितः = स्वर्गपतितः
कल्पनायाः अपोढः = कल्पनापोढः तरङ्गात् अपत्रस्तः = तरङ्गापत्रस्तः
चक्राद् मुक्तः = चक्रमुक्तः

अत्रापि उत्तरपदम् अपेतादिषु पञ्चसु अन्यतमं भवेत्, नान्यत् । किन्तु एषः समासः सर्वत्र न भवति । शिष्टप्रयोगं दृष्ट्वा समासो वक्तव्यः । अतः प्रासादात् पतितः = प्रासादपतितः इति समासो न भवति ।

iii) पञ्चम्यन्तः [१५]शतशब्दः सहस्रशब्दश्च पर इति शब्देन समस्यते ।
शतात् परे = परश्शताः
सहस्रात् परे = परस्सहस्राः
राजदन्तादिगणे निपातनात् शतसहस्रशब्दयोः परनिपातत्वं सुडागमश्च ।

४.१.१.६. षष्ठीतत्पुरुषः

षष्ठीविभक्त्यन्तं[१६] सुबन्तेन समस्यते ।

राज्ञः पुरुषः = राजपुरुषः
देवस्य पूजकः = देवपूजकः
भुवः भर्ता = भूभर्ता
अर्थस्य गौरवम्[१७] = अर्थगौरवम्
बुद्धेः मान्द्यम् = बुद्धिमान्द्यम्
त्रयाणां पन्थाः[२०] = त्रिपथम्
तस्य उपरि[१८] = तदुपरि
मद्राणां राजा[१९] = मद्रराजः
कृष्णस्य सखा[१९] = कृष्णसखः
विष्णोः पूः[२०] = विष्णुपुरम्
राज्ञः धूः[२०] = राजधुरा

---

१४. अपेतापोढमुक्तपतितापत्रस्तैरल्पशः - २.१.३८,
१५. शतसहस्रौ परेणेति वक्तव्यम् (वा)
१६. षष्ठी - २.२.८,
१७. गुणार्थेन षष्ठी न समस्यते । किन्तु निषेधोऽयं क्वाचित्कः ।
१८. अव्ययेन षष्ठी न समस्यते । यथा - ब्राह्मणस्य कृत्वा । किन्तु कृद्भिन्नेन अव्ययेन षष्ठी समस्यते ।
१९. राजाहःसखिभ्यष्टच् - ५.४.९१ ।
२०. ऋक्पूरब्धूः पथामानक्षे - ५.४.७४ इति अच्प्रत्ययः ।

पुरुषस्य आयुः[२१] = पुरुषायुषम्
ब्रह्मणः वर्चः[२२] = ब्रह्मवर्चसम्
राज्ञः वर्चः[२३] = राजवर्चसम्
पाणिनेः उपज्ञा[२४] = पाणिन्युपज्ञम् (ग्रन्थः) (पाणिनिना प्रथमं ज्ञायमानः)
इक्षूणां छाया[२५] = इक्षुच्छायम्

४.१.१.७. सप्तमीतत्पुरुषः

i) सप्तमीविभक्त्यन्तं शौण्ड[२६]-अधि-धूर्त-कितव-प्रवीण-पण्डित-कुशल-निपुण-चपल-सिद्ध-शुष्क-पक्व-[२७]बन्ध-शब्दैः समस्यते ।

अक्षेषु शौण्डः = अक्षशौण्डः
ईश्वरे अधि = ईश्वराधीनः
अक्षेषु धूर्तः = अक्षधूर्तः
अक्षेषु कितवः = अक्षकितवः
वीणायां प्रवीणः = वीणाप्रवीणः
वेदे पण्डितः = वेदपण्डितः
काव्ये कुशलः = काव्यकुशलः
शास्त्रेषु निपुणः = शास्त्रनिपुणः
कार्ये चपलः = कार्यचपलः
काश्यां सिद्धः = काशीसिद्धः
(सिद्धः = निष्पन्नः)
आतपे शुष्कः = आतपशुष्कः
स्थाल्यां पक्वः = स्थालीपक्वः
चक्रे बन्धः = चक्रबन्धः

ii) सप्तम्यन्तं ध्वांक्षवाचिना[२८] समस्यते, किन्तु निन्दायां गम्यमानायाम् ।

तीर्थे ध्वांक्ष इव = तीर्थध्वांक्षः (गुरुकुलेषु यः चिरं न वसति सः इत्यर्थः ।)

तीर्थे काक इव = तीर्थकाकः

---

२१. अचतुर...पुरुषायुष...गोष्ठश्वाः - ५.४.७७ इति सूत्रे निपातनात् अच्प्रत्ययः ।
२२. ब्रह्महस्तिभ्यां वर्चसः - ५.४.७८ इति अच्प्रत्ययः ।
२३. पल्यराजभ्यां चेति वक्तव्यम् (वा) इति अच्प्रत्ययः ।
२४. उपज्ञोपक्रमं तदाद्याचिख्यासायाम् - २.४.२१ इति नपुंसकत्वम् ।
२५. छाया बाहुल्ये - २.४.२२ । पूर्वपदबाहुल्ये एव नपुंसकत्वम् । अतः वृक्षस्य छाया = वृक्षच्छाया इत्यत्र न नपुंसकत्वम् ।
२६. सप्तमी शौण्डैः - २.१.४० (शौण्डादिषु प्रसिद्धाः शब्दाः स्वीकृताः ।)
२७. सिद्धशुष्कपक्वबन्धैश्च - २.१.४१
२८. ध्वांक्षेण क्षेपे - २.१.४२

४.१.२. कर्मधारयः

समानविभक्तन्तयोरेव[२१] कर्मधारयसमासः भवति इति सामान्य-लक्षणम् । अतः कर्मधारयस्य सर्वेषु भेदेषु इदं सामान्यलक्षणम् अनुवर्तते ।

४.१.२.१. विशेषणपूर्वपदः

विशेषणवाचि[३०] सुबन्तं विशेष्यवाचिना सुबन्तेन समस्यते ।

नीलम् उत्पलम्[a] = नीलोत्पलम्
दीर्घा रज्जुः = दीर्घरज्जुः
उन्नतः वृक्षः = उन्नतवृक्षः

अधः प्रदर्शितेषु उदाहरणेषु यानि पूर्वपदानि सन्ति तानि कर्मधारये सदा पूर्वमेव प्रयोक्तव्यानि । यथा - प्रथमः वैयाकरणः इति, वैयाकरणः प्रथम इति वा विवक्षिते प्रथमवैयाकरण इत्येव भवति, न तु वैयाकरणप्रथमः इति ।

---

२१. तत्पुरुषः सामानाधिकरणः कर्मधारयः - १.२.४२
३०. विशेषणं विशेष्येण बहुलम् - २.१.५७

a. जातिशब्दः, गुणशब्दः, क्रियाशब्दः, संज्ञाशब्दश्चेति चतुर्विधः शब्दः अस्ति । १. जातिशब्दाः - वृक्षः, उत्पलम्, इत्यादयः । २. गुणशब्दाः - कुब्जः, शीतम् इत्यादयः । ३. क्रियाशब्दाः - पाचकः, पाठकः, नर्तकः इत्यादयः। ४. संज्ञाशब्दाः - अयोध्या, काशी, देवदत्तः इत्यादयः । गुणक्रियासंज्ञाशब्दसमभिव्याहारे जातिशब्दः विशेष्यसमर्पकः । यथा - दीर्घवृक्षः । पाठकब्राह्मणः । अयोध्यानगरी । गुणशब्दयोः समभिव्याहारे विशेषण-विशेष्यभावस्य नियमः नास्ति । यथा - खञ्जकुब्जः । कुब्जखञ्जः । क्रियाशब्दयोरपि विशेषणविशेष्यभावस्य नियमो नास्ति । यथा- पाठकनर्तकः । नर्तकपाठकः । गुणक्रियाशब्दयोरपि विशेषणविशेष्यभावस्य नियमो नास्ति । यथा - कुब्जपाचकः । पाचककुब्जः । जातिशब्दसमभिव्याहारे संज्ञाशब्दः विशेषणमेव । यथा - कैलासाद्रिः । सामान्यजाति-विशेषजातिशब्दयोः समभिव्याहारे विशेषजातिरेव विशेषणम् । यथा - आम्रवृक्षः । तत्र दीर्घवृक्षादयः विशेषण-पूर्वपदस्य, खञ्जकुब्जः, पाठकनर्तकः, कुब्जपाचकः, इत्यादयः विशेषणोभयपदस्य, कैलासाद्रिः इत्यादयः सम्भावनापूर्वपदस्य च उदाहरणानि इति विवेक्तव्यम् ।

एकः पुरुषः[३१] = एकपुरुषः ।
सर्वे देवाः = सर्वदेवाः ।
जरन्तः नौयायिकाः = जरन्नैयायिकाः ।
जरन् गौः = जरद्गुः ।
पुराणः पुरुषः = पुराणपुरुषः ।
नवाः पाठकाः = नवपाठकाः ।
केवलाः वैयाकरणाः = केवलवैयाकरणाः ।
पूर्वः पुरुषः[३२] = पूर्वपुरुषः ।
अपरः मीमांसकः = अपरमीमांसकः ।
अपरः अर्धः = पश्चार्धः ।
प्रथमः पुरुषः = प्रथमपुरुषः ।
चरमं भाषणम् = चरमभाषणम् ।

जघन्यः श्लोकः = जघन्यश्लोकः ।
समानः मन्त्रः = समानमन्त्रः ।
मध्यं गृहम् = मध्यगृहम् ।
मध्यमः मार्गः = मध्यममार्गः ।
वीरः पुरुषः = वीरपुरुषः ।
सन् वैद्यः = सद्वैद्यः ।
महान् वैयाकरणः = महावैयाकरणः ।
परमः पुरुषः = परमपुरुषः ।
उत्तमः पुरुषः = उत्तमपुरुषः ।
उत्कृष्टः वैद्यः = उत्कृष्टवैद्यः ।
सप्त ऋषयः[३३] = सप्तऋषयः ।
पञ्च आम्राः = पञ्चाम्राः।

---

३१. पूर्वकाल-एक-सर्व-जरत्-पुराण-नव-केवलाः समानाधिकरणेन - २.१.४९ । एते शब्दाः सुबन्तेन समस्यन्ते इत्यर्थः । (पूर्वकालेत्यस्योदाहरणम् - पूर्वं स्नातः पश्चादनुलिप्तः = स्नातानुलिप्तः ।)

३२. पूर्व-अपर-प्रथम-चरम-जघन्य-समान-मध्य-मध्यम-वीराश्च - २.१.४८ । एते शब्दाः सुबन्तेन समस्यन्ते इत्यर्थः । अपरस्यार्धे पश्चभावो वक्तव्यः (वा) सन्-महत्-परम-उत्तम-उत्कृष्टाः पूज्यमानैः - २.१.६१, एते शब्दाः पूज्यमानैः समस्यन्ते इत्यर्थः ।

३३. दिक्संख्ये संज्ञायाम् - २.१.५०. दिग्वाची सङ्ख्यावाची च सुबन्तेन समस्यते संज्ञायां गम्यमानायाम् इत्यर्थः ।

संज्ञायां गम्यमानायामेवेति नियमार्थमिदं सूत्रम् । अतः संख्यावाचिना सह समासः संज्ञाभिन्नस्थले न भवति । अतः एव 'षड्भिः मन्त्रैः, 'अष्टभिः श्लोकैः' इत्येव प्राचीनाः व्यवहरन्ति, न तु षण्मन्त्रैः अष्टश्लोकैः इति । तथापि 'नवरसरुचिराम्' 'त्रिलोकनाथेन' 'षोडशपदार्थानाम्' इत्यादीनां प्रयोगदर्शनात् सख्यावाची संज्ञाभिन्नस्थलेऽपि समस्यते । किन्तु अत्र नवसंख्याकाः रसाः, त्र्यवयवकः लोकः, षोडशसंख्याकाः पदार्थाः इति विग्रहः प्रदर्शनीयः, येन मध्यमपदलोपः समासः भवति । तेन च विंशतिजनाः पञ्चविंशतिश्लोकाः इत्यादयः सिद्धाः ।

४.१.२.२. विशेषणोत्तरपदः

वैयाकरणः खसूचिः[३४] = वैयाकरणखसूचिः ।

मीमांसकः दुर्दुरूटः = मीमांसकदुर्दुरूटः ।

पुरुषः प्रशस्तः[३५] = पुरुषमचर्चिका ।

पण्डितः प्रशस्तः = पण्डितप्रकाण्डम् ।

गौः प्रशस्ता = गोमतल्लिका । विद्वान् प्रशस्तः = विद्वत्तल्लजः ।

४.१.२.३. विशेषणोभयपदः

कृतम् अकृतम्[३६] = कृताकृतम् । कृतम् अपकृतम् = कृतापकृतम् ।
भुक्तम् अभुक्तम् = भुक्ताभुक्तम् । गतं प्रत्यागतम् = गतप्रत्यागतम् ।
पीतम् अपीतम् = पीतापीतम् । यातम् अनुयातम् = यातानुयातम् ।
उदितम् अनुदितम् = उदितानुदितम् ।

४.१.२.४. उपमानपूर्वपदः

[३७]उपमानवाचि सुबन्तं सामान्यवचनैः सुबन्तैः समस्यते ।
कुसुममिव कोमलम् = कुसुमकोमलम् ।
वज्रम् इव कठोरम् = वज्रकठोरम् । शैलः इव उन्नतः = शैलोन्नतः ।

४.१.२.५. उपमानोत्तरपदः

[३८]उपमेयम् उपमानवचनैः व्याघ्रादिभिः समस्यते । किन्तु साधारणर्धमस्य प्रयोगः न करणीयः । यथा - पुरुषः व्याघ्रः इव = पुरुषव्याघ्रः इति समासो भवति । यदा पुरुषः व्याघ्रः इव शूरः इति वक्तुम् इष्यते तदा पुरुषव्याघ्रः शूरः इति पुरुषव्याघ्रपदयोः समासः न करणीयः । शूरः इति साधारणधर्मस्य प्रयोगात् ।

---

३४. कुत्सितानि कुत्सनैः - २.१.५३ कुत्स्यमानानि कुत्सनैः समस्यन्ते ।

३५. प्रशंसावचनैश्च - २.१.६६ प्रशंसावचनैः जातिः समस्यते ।

३६. क्तेन नञ्विशिष्टेनानञ् - २.१.६० अनञ् क्तान्तं नञ्विशिष्टेन क्तान्तेन समस्यते ।

३७. उपमानानि सामान्यवचनैः - २.१.५५ (सामान्यवचनस्य विवरणं ७ - पृष्ठे अस्ति ।)

३८. उपमितं व्याघ्रादिभिः सामान्याप्रयोगे - २.१.५६ (व्याघ्रादिगणे प्रसिद्धाः शब्दाः - व्याघ्रः, सिंहः, ऋक्षः, ऋषभः, हस्ती, पुण्डरीकः, बलाहकः । व्याघ्रादिः आकृतिगणः ।)

पुरुषः सिंहः इव = पुरुषसिंहः । करः किसलयम् इव = करकिसलयम् ।
पुरुषः ऋषभः इव = पुरुषर्षभः ।
पण्डितः पुण्डरीकः इव = पण्डितपुण्डरीकः ।
पार्थिवः इन्द्रः इव = पार्थिवेन्द्रः ।
गौः वृन्दारकः इव[39] = गोवृन्दारकः ।
मुखं पद्मम् इव = मुखपद्मम् ।
पुरुषः नागः इव = पुरुषनागः ।
मुखं कमलम् इव = मुखकमलम् । कपिः कुञ्जरः इव = कपिकुञ्जरः ।

४.१.२.६. अवधारणापूर्वपदः

[40]विशेषणं विशेष्येण समस्यते । अवधारणार्थं द्योतयितुं विग्रहवाक्ये विशेषणात् परम् एवकारः प्रयुज्यते ।

विद्या एव धनम् = विद्याधनम् । तपः एव धनम् = तपोधनम् ।
गुरुः एव देवः = गुरुदेवः । वेदः एव सम्पत् = वेदसम्पत् ।

४.१.२.७. सम्भावनापूर्वपदः

[40]विशेषणं विशेष्येण समस्यते । अत्र विशेषणं संज्ञाशब्दः भवति । विग्रहवाक्ये विशेषणात् परम् 'इति' इति पदं प्रयुज्यते ।

अयोध्या इति नगरी = अयोध्यानगरी । आम्रः इति वृक्षः = आम्रवृक्षः ।
कैलासः इति अद्रिः = कैलासाद्रिः । दशरथः इति राजा = दशरथराजः ।
हिमालयः इति पर्वतः = हिमालयपर्वतः ।

४.१.२८. मध्यमपदलोपः

[40]विशेषणं विशेष्येण समस्यते । किन्तु अत्र विशेषणं विग्रहावस्थायां सदा समस्तं पदं भवति । [41]विशेषणीभूते समस्तपदे यदुत्तरपदं तस्योत्तरपदस्य लोपः भवति । मध्यमपदलोपव्यवहारस्तु इत्थम् – विग्रहावस्थायां तु पदत्रयं भवति । यथा – शाकप्रियः पार्थिवः इति । अत्र मध्ये स्थितस्य प्रियशब्दस्य लोपः । अतः 'मध्यमपदलोपः समासः' इति व्यवहारः ।

---

३९. वृन्दारकनागकुञ्जरैः पूज्यमानम् - २.१.६२ (सामान्यधर्मप्रयोगेऽपि एतैः त्रिभिः शब्दैः समासो भवति । यथा - बलवान् कपिकुञ्जरः ।)

४०. विशेषणं विशेष्येण बहुलम् - २.१.५७

४१. शाकपार्थिवादीनां सिद्धये उत्तरपदलोपस्योपसङ्ख्यानम् (वा) ।

शाकप्रियः पार्थिवः = शाकपार्थिवः । *द्विगुणितं शतम् = द्विशतम् (२०० इत्यर्थ)
देवपूजकः ब्राह्मणः = देवब्राह्मणः
द्व्यधिका विंशतिः = द्वाविंशतिः
द्व्यधिकाः दश = द्वादश
षोडशसङ्ख्याकाः पदार्थाः = षोडशपदार्थाः
द्व्यधिकं शतम् = द्विशतम् (१०२ इत्यर्थः)

४.१.२.९. मयूरव्यंसकादिः

[४२]समासविधायकेन सामान्यनियमेन यत् सिद्धं न भवति तत् मयूरव्यंसकादिगणे पठितम् । 'अविहितलक्षणः तत्पुरुषः मयूरव्यंसकादिषु द्रष्टव्यः' इति काशिकायाम् अभिहितम् ।

मयूरः व्यंसकः = मयूरव्यंसकः । उदक् अवाक् = उच्चावचम् ।
निश्चितं प्रचितम् = निश्चप्रचम् । नास्ति किञ्चन यस्य सः = अकिञ्चनः ।
नास्ति कुतो भयं यस्य सः = अकुतोभयः ।
अन्यो राजा = राजान्तरम् । चिदेव = चिन्मात्रम् ।
अश्नीत पिबत इत्येवं सततं यत्राभिधीयते सा = अश्नीतपिबता ।
पचत भृज्जत इत्येवं सततं यत्राभिधीयते सा = पचतभृज्जता ।
खादत मोदत इत्येवं सततं यत्राभिधीयते सा = खादतमोदता ।
जहि जोडं जहि जोडम् इति आभीक्ष्ण्येन य आह सः = जहिजोडः ।

४.१.३. द्विगुसमासः

[४३]सङ्ख्यावाचकं सुबन्तेन समस्यते - i) तद्धितार्थविषये ii) उत्तरपदे परतः, iii) समाहारे वाच्ये वा । अतः द्विगुसमासः त्रिधा भवति - i) तद्धितार्थद्विगुः, ii) उत्तरपदपरद्विगुः, iii) समाहारद्विगुः चेति ।

---

* **इदमत्र ज्ञेयम्** - द्विशतमित्यस्य अर्थः द्व्युत्तरं शतम् (१०२) इति । 'शतद्वयम्' इत्यर्थे द्विशती इति प्रयोक्तव्यम् । यतः 'द्वयोः शतयोः समाहारः' इति विवक्षिते द्विगुसमासे ईकारान्तेन भाव्यम् । त्रिशती इत्यादयः प्रसिद्धाः शब्दाः खलु । किन्तु 'शतद्वयम्' इत्यार्थे 'द्विशतम्' इति तत्र तत्र प्रयुज्यते । अतः एतादृशस्य अन्वाख्यानं 'द्विगुणितं शतम् द्विशतम्' इत्येवंरीत्या करणीयम् । तेन त्रिशतम्, पञ्चशतम्, अष्टशतम् इत्यादयः सिद्धाः ।, ४१-पृष्ठे टिप्पणी अपि द्रष्टव्या ।

४२. मयूरव्यंसकादयश्च- २.१.७२ (मयूरव्यंसकादयः शब्दाः निपात्यन्ते इति सुत्रार्थः । निपातनं नाम सिद्धप्रक्रियस्य शब्दस्वरूपस्य निर्देशः ।)

४३. तद्धितार्थोत्तरपदसमाहारे च - २.१.५१.

४.१.३.१. तद्धितार्थद्विगुः

[४४]षण्णां मातृणाम् अपत्यम् = षाण्मातुरः
द्वयोः मात्रोः अपत्यम् = द्वैमातुरः
पञ्चसु कपालेषु संस्कृतः = पञ्चकपालः (पुरोडाशः)

४.१.३.२. उत्तरपदद्विगुः

[४५]पञ्च गावः धनं यस्य सः = पञ्चगवधनः
दश गावः धनं यस्य सः = दशगवधनः
द्वे अहनी प्रिये यस्य सः = द्व्यह्नप्रियः
पञ्च सखायः प्रियाः यस्य सः = पञ्चसखप्रियः

४.१.३.३. समाहारद्विगुः

[४६]पञ्चनां गवां समाहारः = पञ्चगवम्[४७]
पञ्चानां पात्राणां समाहारः = पञ्चपात्रम्
त्रयाणां भुवनानां समाहारः = त्रिभुवनम्
चतुर्णां युगानां समाहारः = चतुर्युगम्
सप्तानाम् अह्नां समाहारः = सप्ताहः[४८]

---

४४. ८-पृष्ठे टिप्पणीं पश्यन्तु ।
४५. ८-पृष्ठे टिप्पणीं पश्यन्तु ।
४६. समाहारद्विगुः एकवचनान्तः भवति । (द्विगुरेकवचनम् - २.४.१)
४७.२२- पृष्ठे समासान्तप्रत्ययनियमं पश्यन्तु ।

समाहारद्विगौ लिङ्गव्यवस्था - i) स नपुंसकम् - २.४.१७ 'समाहारे द्विगुः द्वन्द्वः च नपुंसकलिङ्गं स्यात्' इत्यर्थः । अतः नपुंसकता सर्वत्र प्राप्ता । ii) किन्तु अहश्शब्दः द्विगौ पुंल्लिङ्गः स्यात् । रात्राह्नाहाः पुंसि - २.४.२१ इति सूत्रम् अत्र प्रमाणम्, iii) अकारान्तशब्दान्तः द्विगुः ईकारान्तस्त्रीलिङ्गः भवति । अत्र 'अकारान्तोत्तरपदो द्विगुः स्त्रियाम् इष्टः' इति वार्तिकं, द्विगोः - ४.१.२१ इति सूत्रं च प्रमाणम् । किन्तु अयं नियमः पात्रादिगणे प्रविष्टाः ये शब्दाः (पात्रम्, भुवनम्, युगम् इत्यादयः) तदन्तस्य विषये नास्ति । 'पात्राद्यन्तस्य न' इति वार्तिकम् अत्र प्रमाणम् । iv) रात्रिशब्देन सह द्विगुसमासे जाते रात्रिशब्दः अकारान्तः भवति । तथापि स्त्रीलिङ्गता नास्ति । किन्तु नपुंसकता एव । 'सङ्ख्यापूर्वं रात्रं क्लीबम्' इति गणसूत्रम् अत्र प्रमाणम् ।
४८. २२- पृष्ठे समासान्तप्रत्ययनियमं पश्यन्तु ।

द्वयोः अह्नोः समाहारः = द्व्यहः
तिसृणां रात्रीणां समाहारः = त्रिरात्रम्[४९]
पञ्चानां रात्रीणां समाहारः = पञ्चरात्रम्
नवानां रात्रीणां समाहारः = नवरात्रम्
त्रयाणां लोकानां समाहारः = त्रिलोकी
पञ्चानां वटाणां समाहारः = पञ्चवटी

४.१.४. नञ्प्रभृतयः

४.१.४.१. नञ्समासः[५०]

नञ् (न) सुबन्तेन समस्यते ।

न सन्देहः = असन्देहः[५१]
न विघ्नः = अविघ्नः
न अश्वः = अनश्वः
न आगमनम् = अनागमनम्
न विवादः = अविवादः
न पटुः = अपटुः
न उपलब्धिः = अनुपलब्धिः
[५२]न पन्थाः = अपन्थाः / अपथम्

'अविघ्नमस्तु' इत्यादौ 'विघ्नानाम् अभावः' इति विग्रहः । अर्थभावे अव्ययीभावसमासोऽयम् ।

४.१.४.२. कुसमासः

[५३]कुशब्दः सुबन्तेन नित्यं समस्ते । अतः अस्वपदविग्रहः ।

---

४९. २१- पृष्ठे समासान्तप्रत्ययनियमं पश्यन्तु ।

५०. नञ् - २.२.६१

५१. १८ - पृष्टे नियमं पश्यन्तु ।

५२. पथो विभाषा - ५.४.७२ इति सूत्रेण विकल्पेन समासान्तप्रत्ययः भवति । प्रत्ययाभावे अपन्थाः । प्रत्यये सति अपथम् । अव्ययात्परः पथशब्दः नपुंसकं भवति । 'पथः सङ्ख्याव्ययादे' इति वार्तिकम् अत्र प्रमाणम् ।
इदमत्र ज्ञेयम् - न एकधा = नैकधा, न आन्तरीयकम् = नान्तरीयकम् इत्यादौ 'न' शब्देन समासः, न तु 'नञ्' इति शब्देन । 'नञ्' इति, 'न' इति च अव्ययद्वयम् । द्वयोरप्यर्थः समानः एव । किन्तु नञा समासे नकारस्य (न्) लोपः भवति । नशब्देन समासे लोपो न भवति ।

५३. कुगतिप्रादयः २.२.१८

कुत्सितः पुरुषः = कुपुरुषः / कापुरुषः[५४]
कुत्सितम् अन्नम् = कदन्नम्[५५]   कुत्सितः अश्वः = कदश्वः

४.१.४.३. गतिसमासः

गतिसंज्ञायुक्तं शब्दान्तरेण नित्यं समस्यते । गतिर्नाम काचन संज्ञा । केषाञ्चित् शब्दानां पाणिनिना गतिसंज्ञा विहिता । गतिसंज्ञाविधायकानि सूत्राणि बहूनि सन्ति । अतः अत्र तानि न उल्लिख्यन्ते । गतिसमासे सर्वम् अपि पूर्वपदं गतिसंज्ञायुक्तं भवत्येव इति ज्ञेयम् । गतिसमासोऽयं नित्यः । अतः अस्वपदविग्रहः प्रदर्शनीयः ।

अङ्गीकारं कृत्वा = ऊरीकृत्य
अङ्गीकारं कृत्वा = उररीकृत्य
अशुक्लं शुक्लं कृत्वा = शुक्लीकृत्य
पटपटा इति शब्दं कृत्वा = पटपटाकृत्य
खाट् इति शब्दं कृत्वा = खाट्कृत्य
आदरं कृत्वा = सत्कृत्य
अनादरं कृत्वा = असत्कृत्य
परिष्कारं कृत्वा = अलङ्कृत्य
अभिलाषातिशयं निहत्य = मनोहत्य[५६]
पुरस्कारं कृत्वा = पुरस्कृत्य
तिरोधानं प्राप्य = अस्तंगत्य

व्यवहितो भूत्वा = तिरोभूय
हस्तं गृहीत्वा = हस्तेकृत्य (परिणीय)
पाणिं गृहीत्वा = पाणौकृत्य (परिणीय)
तिरस्कृत्वा[५७] = तिरस्कृत्य
उपाजेकृत्वा = उपाजेकृत्य (दुर्बलस्य बलम् आधाय)
साक्षात्कृत्वा = साक्षात्कृत्य (अप्रत्यक्षं प्रत्यक्षं कृत्वा)
उरसिकृत्वा = उरसिकृत्य (अभ्युपगम्य)
मनसिकृत्वा = मनसिकृत्य (निश्चित्य)

---

५४. पुरुषशब्दे परे 'कु' इत्यस्य विकल्पेन 'का' इत्यादेशः भवति । विभाषा पुरुषे - ६.३.१०६)

५५. अजादौ उत्तरपदे 'कद्' इत्यादेशः भवति । (कोः कत्तत्पुरुषेऽचि - ६.३.१०१)

५६. 'मनोहत्य पयः पिबति' इति रमणीयः प्राचीनप्रयोगः । अभिलाषनिवृत्तिपर्यन्तं पयः पिबति इत्यर्थः । अत्र मनःशब्दः अभिलाषातिशये वर्तते ।

५७. तिरस्कृत्य, उपाजेकृत्य, साक्षात्कृत्य, उरसिकृत्य, मनसिकृत्य इत्येतेषु स्वपदविग्रहःदर्शितः । एषु विकल्पेन गतिसंज्ञाविधानात् उभयथापि प्रयोगः साधुः । तिरस्कृत्वा इत्यादिकं व्यस्तं, तिरस्कृत्य इत्यादिकं समस्तम् इति ज्ञेयम् ।

जीविकामिव कृत्वा – जीविकाकृत्य (जीविकाम् इव अवश्यं कृत्वा)
उपनिषदमिव कृत्वा – उपनिषत्कृत्य (उपनिषदमिव रहसि ग्राह्यत्वेन कृत्वा)

४.१.४.४. प्रादिसमासः

[५७]प्रादयः शब्दान्तरेण नित्यं समास्यन्ते । प्रादयः – प्र, परा, अप, सम्, इत्यादयः द्वाविंशतिः । नित्यसमासत्वात् अस्वपदविग्रहः ।

[५८]शोभनः पुरुषः – सुपुरुषः
शोभनः जनः – सुजनः
दुराचारः पुरुषः – दुष्पुरुषः
प्र[६०] – गतः आचार्यः – प्राचार्यः
[६१]अति – क्रान्तं मालाम् – अतिमालः
अभि – गतः मुखम् – अभिमुखः
प्रति – गतः अक्षम् (इन्द्रियम्) – प्रत्यक्षः
अति – क्रान्ता श्वानम् – *अतिश्वी (सेवा)
[६२]अव – क्रुष्टः कोकिलया – अवकोकिलः (कोकिलया आहूतः)
[६३]परि – ग्लानः अध्ययनाय – पर्यध्ययनः (परिग्लानः)
[६४]निर् – क्रान्तः कौशाम्ब्याः – निष्कौशाम्बिः
उत् – क्रान्तः कुलात् – उत्कुलः

---

५८. कुगतिप्रादयः - २.२.१८.
५९. प्रादयो गत्याद्यर्थे प्रथमया (वा)
६०. 'प्र' इत्यस्य विवरणं 'गतः' इति । अतः न स्वपदेन विग्रहः । 'अभिगतः' इत्यादौ अपि एवम् एव ।
६१. अत्यादयः क्रान्ताद्यर्थे द्वितीयया (वा)
६२. अवादयः क्रुष्टाद्यर्थे तृतीयया (वा)
६३. पर्यादयः ग्लानाद्यर्थे चतुर्थ्या (वा)
६४. निरादयः क्रान्ताद्यर्थे पञ्चम्या (वा)
* अतेः शुनः - ५.८.९६ 'अति' इति अव्ययात् परो यः 'श्वन्'शब्दः तदन्तात् तत्पुरुषात् टच् स्यात् । स्त्रीलिङ्गे टित्वात् ङीप् ।

४.१.४.५. उपपदसमासः

[६५]उपपदं सुबन्तं शब्दान्तरेण नित्यं समस्यते । उपपदं नाम काचन संज्ञा । उपपदसमासे सर्वमपि पूर्वपदं उपपदसंज्ञायुक्तं भवति । नित्यसमासत्वात् अस्वपदविग्रहः ।

[६६]कुम्भं करोति इति = कुम्भकारः
निशां करोति इति = निशाकरः
तुन्दं परिमार्ष्टि इति = तुन्दपरिमृजः
उष्णं भुङ्क्ते इति = उष्णभोजी
सोमेन इष्टवान् इति = सोमयाजी
शास्त्रं करोति इति = शास्त्रकृत् / शास्त्रकारः
भाष्यं करोति इति = भाष्यकृत् / भाष्यकारः
[६७]प्रियं वदति इति = प्रियंवदः
भयं करोति इति = भयङ्करः
वशं वदति इति = वशंवदः
अभयं करोति इति = अभयङ्करः
पण्डितम् (आत्मानम्) मन्यते इति = पण्डितंमन्यः/ पण्डितंमानी
[६८]शय्यायाः उत्थायम् = शय्योत्थायम्[६९]
उच्चैः कृत्वा = उच्चैःकृत्य
विना कृत्वा = विनाकृत्य
नानाकृत्वा = नानाकृत्य
एकधा भूत्वा = एकधाभूय
तूष्णीं भूत्वा = तूष्णीम्भूय

---

६५. उपपदमतिङ् - २.२.१७.

६६. कुम्भं करोति इति अस्वपदविग्रहः, उपपदसमासस्य नित्यत्वात् । अतः तिङन्तेन समासः इति न मन्तव्यम् ।

६७. प्रियंवदः इत्यादौ मुमागमः, न तु द्वितीयायाः अलुक् ।

६८. शय्यायाः उत्थायम् इत्यारभ्य तूष्णीं भूत्वा पर्यन्तं स्वपदविग्रहः दर्शितः । तेषां विकल्पेन उपपदसमासस्य विधानात् । अतः उच्चैः कृत्वा इत्यादिकं व्यस्तम्, उच्चैःकृत्य इत्यादिकं समस्तमिति ज्ञेयम् ।

६९. शय्योत्थायं धावति इति प्राचीनः प्रयोगः । 'एवं नाम त्वरते यदवश्यकर्तव्यमपि नापेक्षते, शय्योत्थानमात्रम् अपेक्षते' इति अस्य वाक्यस्य अर्थः ।

४.२. बहुव्रीहिः

अन्यस्य पदस्य अर्थे वर्तमानम् अनेकं सुबन्तं समस्यते । लिङ्गत्रयेऽपि बहुव्रीहिः सम्भवति ।

४.२.१. सामान्यबहुव्रीहिः (समानाधिकरणबहुव्रीहिः)

बहुव्रीहिः सामान्यः विशेषश्चेति द्विधा इति पूर्वम् उक्तम् । समानाधिकरणबहुव्रीहिरेव अत्र सामान्यशब्देन व्यवहृतः । सामान्यः षोढा इत्युक्तम् । तेषां षण्णामपि पृथक् पृथक् उदाहरणानि अत्र न उल्लिख्यन्ते । षट्सु भेदेषु कुत्र अन्तर्भवतीति स्वयम् ऊहनीयम् ।

ऊढः रथः येन सः = ऊढरथः आरूढं यानं येन सः = आरूढयानः
कृतं भोजनं येन सः = कृतभोजनः प्रविष्टा शाला येन सः = प्रविष्टशालः
अधीतं काव्यं यया सा = अधीतकाव्या
धृतानि पुष्पाणि यया सा = धृतपुष्पा
उद्धृतः ओदनः यस्याः सा = उद्धृतौदना (स्थाली)
पतितानि पर्णानि यस्मात् सः = पतितपर्णः (वृक्षः)
गलितानि पुष्पाणि यस्याः सा = गलितपुष्पा (लता)
चित्राः गावः यस्य सः = चित्रगुः
[१]रूपवती भार्या यस्य सः = रूपवद्भार्यः
[२]गङ्गा भार्या यस्य सः = गङ्गाभार्यः सर्वा प्रिया यस्य सः = सर्वप्रियः
[३]पाचिका भार्या यस्य सः = पाचिकाभार्यः
वैयाकरणी भार्या यस्य सः = वैयाकरणभार्यः
[४]सुकेशी भार्या यस्य सः = सुकेशीभार्यः
पट्वी भार्या यस्य सः = पटुभार्यः

---

१. पूर्वपदे पुंवद्भावः । १९ - पृष्ठे नियमं पश्यन्तु ।
२. गङ्गाशब्दःभाषितपुंस्कः न । अतः न पुवंद्भावः ।
३. न कोपधायाः ७.३.३७ – कोपधायाः स्त्रिया न पुंवत् ।
४. स्वङ्गाच्चेतः ६.३.४० - स्वाङ्गाद् य ईकारः तदन्ता स्त्री न पुंवत् ।

दृढा भक्तिः यस्य सः = दृढाभक्तिः*
विशाले अक्षिणी यस्य सः = विशालाक्षः
निर्गतः वृत्तेः = निवृत्तिः, निवृत्तिः धर्मः यस्य सः = निवृत्तिधर्मा
वीराः पुरुषाः यस्मिन् सः = वीरपुरुषः (ग्रामः)

४.२.२. व्यधिकरणबहुव्रीहिः

समानविभक्त्यन्तयोः समासे समानाधिकरणबहुव्रीहिः इति उच्यते । विभिन्नविभक्त्यन्तयोः समासे व्यधिकरणबहुव्रीहिः इति कथ्यते ।

गदा पाणौ यस्य सः = गदापाणिः
गड्डुः कण्ठे यस्य सः = गड्डुकण्ठः (गड्डुः = ग्रीवादिगतः दुर्मांसागोलः)
भाले चन्द्रः यस्य सः = भालचन्द्रः
चन्द्रः मौलौ यस्य सः = चन्द्रमौलिः
विषं कण्ठे यरय सः = विषकण्ठः
[५]कण्ठे कालः यस्य सः = कण्ठेकालः

४.२.३. सङ्ख्योत्तरपदः

[६]अव्यय-आसन्न-अदूर-अधिकशब्दाः सङ्ख्येयार्थकेन सङ्ख्याशब्देन समस्यन्ते ।

दशानां समीपे ये सन्ति ते = उपदशाः[७]
विंशतेः समीपे ये सन्ति ते = उपविंशाः
त्रिंशतः समीपे ये सन्ति ते = उपत्रिंशाः
चत्वारिंशतः समीपे ये सन्ति ते = उपचत्वारिंशाः
पञ्चाशतः समीपे ये सन्ति ते = उपपञ्चाशाः
षष्टेः समीपे ये सन्ति ते = उपषष्टाः
सप्ततेः समीपे ये सन्ति ते = उपसप्तताः
अशीतेः समीपे ये सन्ति ते = उपाशीताः
नवतेः समीपे ये सन्ति ते = उपनवताः

---

* अत्र न पुंवद्भावः । दृढभक्तिः इति तु सामान्ये नपुंसकमाश्रित्य दृढं भक्तिः यस्य सः इति व्युत्पाद्यः ।

५. अलुक्समासः अयम् ।

६. सङ्ख्याव्ययासन्नादूराधिकसङ्ख्याः* सङ्ख्येये-२.२.२५ (*सङ्ख्योभयपदे उदाहरणं द्रष्टव्यम् ।)

७. सङ्ख्योत्तरपदसमासे सर्वे बहुवचनान्ताः भवन्ति ।

शतस्य समीपे ये सन्ति ते - उपशताः
पञ्चविंशतेः आसन्नाः - आसन्नपञ्चविंशाः
त्रिंशतः अदूराः - अदूरत्रिंशाः
पञ्चाशतः अधिकाः - अधिकपञ्चाशाः
सहस्रात् अधिकाः - अधिकसहस्राः*

४.२.४. सङ्ख्योभयपदः

सङ्ख्येयार्थकं सङ्ख्येयपदं सङ्ख्येयार्थकेन सङ्ख्यापदेन समस्यते ।

द्वौ वा त्रयः वा = द्वित्राः
त्रयः वा चत्वारः वा = त्रिचतुराः
पञ्च वा षड् वा = पञ्चषाः

४.२.५. सहपूर्वपदः

[८]'सह' इत्येतत् तृतीयान्तेन समस्यते ।

पुत्रेण सह वर्तते इति = सपुत्रः/सहपुत्रः[९]
कुटुम्बेन सह वर्तते इति = सकुटुम्बः/सहकुटुम्बः
कर्मणा सह वर्तते इति = सकर्मकः
लोम्ना सह वर्तते इति = सलोमकः

४.२.६. व्यतिहारलक्षणः[१०]

केशेषु केशेषु गृहीत्वा इदं युद्धं प्रवृत्तम् = केशाकेशि[११]
दण्डैः दण्डैः प्रहृत्य इदं युद्धं प्रवृत्तम् = दण्डादण्डि
मुष्टिभिः मुष्टिभिः प्रहृत्य इदं युद्धं प्रवृत्तम् = मुष्टीमुष्टि
बाहौ बाहौ गृहीत्वा इदं युद्धं प्रवृत्तम् = बाहूबाहवि

---

* 'उपदशाः' इत्यादिषु डच् प्रत्ययो भवति । तेन टेर्लोपः । यद्यन्ते 'विंशति' भवति, तदा 'ति' इत्यस्यैव लोपः ।

८. तेन सहेति तुल्ययोगे - २.२.२८

९. वोपसर्जनस्य - ६.३.७२ बहुव्रीहेः अवयवस्य सहस्य सः स्यात् विकल्पेन ।

१०. तत्र तेनेदमिति सरूपे - २.२.२७ सप्तम्यन्ते ग्रहणविषये सरूपे पदे, तृतीयान्ते च प्रहरणविषये इदं युद्धं प्रवृत्तम् इत्यर्थे समस्यते कर्मव्यतिहारे द्योत्ये ।

११. व्यतिहारलक्षणस्य सर्वाणि उदाहरणानि अव्ययानि भवन्ति ।

४.२.७. दिगन्तराललक्षणः

दिङ्नामानि[१२] सुबन्तानि अन्तराले वाच्ये परस्परं समस्यन्ते । (दिशां नामानि – दिङ्नामानि ।)

दक्षिणस्याः पूर्वस्याश्च दिशो यदन्तरालम् – दक्षिणपूर्वा (आग्नेयी दिक्)
पूर्वस्याः उत्तरस्याः च दिशो यदन्तरालम् – पूर्वोत्तरा (ऐशानी दिक्)
उत्तरस्याः पश्चिमायाः च दिशो यदन्तरालम् – उत्तरपश्चिमा (वायवी दिक्)
पश्चिमायाः दक्षिणस्याः च दिशो यदन्तरालम् – पश्चिमदक्षिणा (नैर्ऋती दिक्)

४.२.८. नञ्बहुव्रीहिः

[१३]'अविद्यमानम्' इति पदं सुबन्तेन समस्यते । समासे जाते विद्यमानपदस्य लोपो भवति ।

अविद्यमानः पुत्रः यस्य सः – अपुत्रः
अविद्यमानम् अपत्यं यस्य सः – अनपत्यः[१४]
अविद्यमाना पुत्री यस्य सः – अपुत्रीकः[१५]
अविद्यमानः प्रजा यस्य सः – अप्रजाः[१६] (सकारान्तः शब्दः)
अविद्यमाना मेधा यस्य सः – अमेधाः[१६] (सकारान्तः शब्दः)

४.२.९. प्रादिबहुव्रीहिः[१७]

प्रादिभ्यः परं धातुजप्रकृतिकप्रथमान्तं अन्येन प्रथमान्तेन समस्यते । परस्य धातुजस्य लोपश्च भवति ।

निर्गता दया यस्मात् सः – निर्दयः दुर्गता मेधा यस्य सः – दर्मेधाः[१६]
निर्गतम् अपत्यं यस्मात् सः – निरपत्यः शोभना मेधा यस्य सः – सुमेधाः[१६]
निर्गता करुणा यस्मात् सः – निष्करुणः

---

१२. दिङ्नामान्यन्तराले – २.२.२६

१३. नञोऽस्त्यर्थानां वाच्यो वा चोत्तरपदलोपः (वा) – नञः परेषाम् अस्त्यर्थवाचिनां समासः इति वार्तिकार्थः । तथापि 'अविद्यमानम्' इति पदेनैव प्रायः विग्रहः उच्यते इति उपरि अविद्यमानम् इति लिखितम् ।

१४. १८– पृष्ठं पश्यन्तु,

१५. २५ – पृष्ठं पश्यन्तु ।

१६. नित्यमसिच् प्रजामेधयोः – ५.४.१२२ – नञ्, दुर्, सु इत्येतेभ्यः पराभ्यां प्रजा-मेधाशब्दाभ्याम् असिच्प्रत्ययः भवति ।

१७. प्रादिभ्यो धातुजस्य वाच्यो वा चोत्तरपदलोपः (वा)

उद्गतः गन्धः यस्य सः = उद्गन्धिः[१७]

शोभनः गन्धः यस्य सः = सुगन्धिः[१७]

शोभनौ पादौ यस्य सः = सुपाद्[१८]

शोभनाः दन्ताः यस्याः सा = सुदती[१९]

शोभनाः दन्ताः यस्य सः = सुदन्[१९]

उन्नता नासिका यस्य सः = उन्नसः[२०]

४.२.१०. उपमानपूर्वपदः

i) [२१]सप्तम्यन्तसहितम् उपमानसहितश्च समस्तपदं पदान्तरेण समस्यते । अस्मिन् समासे विग्रहावस्थायां पूर्वपदं समस्तम् एव भवति । तस्मिन् पदे यत् उत्तरपदं तस्य लोपश्च भवति ।

ii) [२२]केवलम् उपमानवाचकम् अपि अन्येन सुबन्तेन समस्यते ।

कण्ठेस्थः कालः यस्य सः = कण्ठेकालः

गजाननम् इव आननं यस्य सः = गजाननः

उष्ट्रमुखम् इव मुखं यस्यः सः = उष्ट्रमुखः

खरमुखम् इव मुखं यस्य सः = खरमुखः

पुण्डरीके इव अक्षिणी यस्य सः = पुण्डरीकाक्षः[२३]

जलजे इव अक्षिणी यस्याः सा = जलजाक्षी[२३]

कुण्डम् इव ऊधः यस्याः सा = कुण्डोघ्नी (गौः)[२४]

घटः इव ऊधः यस्याः सा = घटोघ्नी (गौः)[२४]

---

१७. २४-पृष्ठं पश्यन्तु । १८. २५-पृष्ठं पश्यन्तु ।

१९. वयसि दन्तस्य दतृ - ५.४.१४१ - सङ्ख्या-सु-पूर्वस्य दन्तस्य दतृ (दत्) इत्यादेशः भवति वयसि गम्यमाने ।

२०. उपसर्गाच्च - ५.४.११९ - प्रादेर्यो नासिकाशब्दः तदन्ताद् बहुव्रीहेः अच्, नासिकायाः नसादेशश्च ।

२१. सप्तम्युपमानपूर्वपदस्योत्तरपदलोपश्च (वा)

२२. अनेकमन्यपदार्थे - २.२.२४

२३. बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच् - ५.४.११३. - स्वाङ्गवाचि-सक्थि-अक्षि-अन्तात् बहुव्रीहेः षच्(अ)प्रत्ययो भवति । [स्त्रीलिङ्गे षित्वात् ङीष् (इ)]

२४. ऊधसोऽनङ् - ५.४.१३१ ऊधोन्तस्य बहुव्रीहेः 'अनङ्' - आदेशः भवति स्त्रीलिङ्गे । बहुव्रीहेरूधसो ङीष् - ४.१.२५ इति ङीष् (ई) ।

४.३. द्वन्द्वसमासः

[२५]इतरेतरयोगे समाहारे च अर्थे वर्तमानम् अनेकं सुबन्तं समस्यते। (इतरेतरयोगो नाम = मिलितानाम् एकस्मिन् क्रियापदेऽन्वयः। समाहारो नाम = समूहः।) अतः द्वन्द्वः इतरेतरः समाहारश्चेति द्विधा। इतरेतरः द्वयोरपि पदयोः भवति, बहूनामपि पदानां भवति। समाहारेऽपि तथैव। किन्तु समाहारद्वन्द्वः क्वचिन्नित्यः।

४.३.१. इतरेतरद्वन्द्वः

[२६]हरिश्च हरश्च	=	हरिहरौ
[२७]हरिश्च गुरुश्च हरश्च	=	हरिहरगुरवः / हरिगुरुहराः
[२८]ईशश्च कृष्णश्च	=	ईशकृष्णौ
[२९]अश्वश्च रथश्च इन्द्रश्च	=	अश्वरथेन्द्राः/ इन्द्राश्वरथाः
[३०]इन्द्रश्च अग्निश्च	=	इन्द्राग्नी
[३१]शिवश्च केशवश्च	=	शिवकेशवौ
धवश्च खदिरश्च	=	धवखदिरौ
ग्रीष्मश्च वसन्तश्च	=	ग्रीष्मवसन्तौ
[३२]हेमन्तश्च शिशिरश्च वसन्तश्च	=	हेमन्तशिशिरवसन्ताः
कृत्तिका च रोहिणी च	=	कृत्तिकारोहिण्यौ
[३३]माता च पिता च	=	मातापितरौ
युधिष्ठिरश्च अर्जुनश्च	=	युधिष्ठिरार्जुनौ

---

२५. चार्थे द्वन्द्वः - २.२.२९

२६. द्वन्द्वे घि - २.२.३२ ह्रस्वेकारान्तं ह्रस्वोकारान्तं च पूर्वं प्रयोज्यम्। किन्तु सखिशब्दविषये नायं नियमः।

२७. अनेकप्राप्तौ एकत्र नियमोऽनियमः शेषे (वा)

२८. अजाद्यदन्तम् - २.२.३३ अजादित्वे सति अदन्तं यत् तत्पूर्वं प्रयोज्यम्।

२९. बहुष्वनियमः (वा)

३०. घ्यन्तादजाद्यदन्तं विप्रतिषेधेन (वा) 'द्वन्द्वे घि इति नियमस्य 'अजाद्यदन्तम्' इति नियमस्य च एकत्र प्राप्तौ अजाद्यदन्तमेव प्रवर्तते।

३१. अल्पाच्तरम् - २.२.३४ - अल्पसङ्ख्याकाच्पदं पूर्वं प्रयोज्यम्।

३२. ऋतुनक्षत्राणां समाक्षरणामानुपूर्व्येण (वा) - पूर्वं प्रयोज्यमित्यर्थः।

३३. अभ्यर्हितश्च (वा) 'श्रेष्ठः पूर्वं प्रयोज्यः' इत्यर्थः।

४.३.२. समाहारद्वन्द्वः

[३४]संज्ञाश्च परिभाषाश्च एतासां समाहारः = संज्ञापरिभाषम् ।
घटश्च पटश्च अनयोः समाहारः = घटपटम्

४.३.३. नित्यसमाहारद्वन्द्वः

[३५]पाणी च पादौ च एतेषां समाहारः = पाणिपादम्
मार्दङ्गिकाश्च पाणविकाश्च एतेषां समाहारः = मार्दङ्गिकपाणविकम्
[३६]रथिकाश्च अश्वारोहाश्च एतेषां समाहारः = रथिकाश्वारोहम्
[३७]धानाश्च शष्कुल्यश्च एतासां समाहारः = धानाशष्कुलि
[३८]यूकाश्च लिक्षाश्च एतासां समाहारः = यूकालिक्षम्
[३९]अहिश्च नकुलश्च अनयोः समाहारः = अहिनकुलम्
गौश्च व्याघ्रश्च अनयोः समाहारः = गोव्याघ्रम्
काकश्च उलूकश्च अनयोः समाहारः = काकोलूकम्
[४०]गावश्च अश्वाश्च एतेषां समाहारः = गवाश्वम्
पुत्रश्च पौत्रश्च अनयोः समाहारः = पुत्रपौत्रम्
दासी च दासश्च अनयोः समाहारः = दासीदासम्

---

३४. संज्ञाश्च परिभाषाश्च = संज्ञापरिभाषाः इति इतरेतरोऽपि भवति । एवं घटपटौ ।

३५., ३६. द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम् २.४.२ - प्राण्यङ्गानां तूर्याङ्गानां सेनाङ्गानाञ्च द्वन्द्वः नित्यम् एकवत्स्यात् ।

३७. जातिरप्राणिनाम् २.४.६ - प्राणिवर्ज्यद्रव्यजातिवाचिनां द्वन्द्वः नित्यम् एकवत्स्यात् ।

३८. क्षुद्रजन्तवः- २.४.८ - क्षुद्रजन्तूनां समाहारे द्वन्द्वः नित्यमेकवत्स्यात् । (आ नकुलात् क्षुद्रजन्तवः ।)

३९. येषां च विरोधः शाश्वतिकः २.५.९ - समाहारे द्वन्द्वः नित्यमेकवत्स्यात् ।

४०. गवाश्वप्रभृतीनि च - २.४.११ - यथोच्चारितानि साधूनि स्युः ।

४.४. अव्ययीभावः

[४१]विभक्त्यर्थादिषु वर्तमानम् अव्ययं सुबन्तेन समस्यते । एषः अव्ययीभावः त्रिधा - i) अव्ययपूर्वपदः, ii) अव्ययोत्तरपदः, iii) अव्ययोत्तरपदरहितश्चेति । अत्र 'अधिहरि' इत्यारभ्य यावन्नामम् इति पर्यन्तं नित्यसमासः । शाकप्रति इत्यपि नित्यसमास । अतः एषु अस्वपदविग्रहः प्रदर्शितः । अन्ये तु विकल्पेन भवन्ति ।

४.४.१. अव्ययपूर्वपदः

१. विभक्त्यर्थे - हरौ इति = अधिहरि
२. समीपार्थे - कृष्णस्य समीपम् = उपकृष्णम्
३. समृद्ध्यर्थे - मद्राणां समृद्धिः = सुमद्रम्
४. व्यृद्ध्यर्थे - यवनानां व्यृद्धिः = दुर्यवनम् (व्यृद्धिः = विगता ऋद्धिः)
५. अर्थाभावार्थे - मक्षिकाणाम् अभावः = निर्मक्षिकम्
६. अत्ययार्थे - हिमस्य अत्ययः = अतिहिमम् (अत्ययः = ध्वंसः)
७. असम्प्रत्यर्थे - निद्रा सम्प्रति न युज्यते इति = अतिनिद्रम्
८. शब्दप्रादुर्भावार्थे - हरिशब्दस्य प्रकाशः = इतिहरि
९. पश्चादार्थे = विष्णोः पश्चात् = अनुविष्णु
१०. यथार्थश्चतुर्धा -
    i) योग्यतार्थे - रूपस्य योग्यम् = अनुरूपम्
    ii) वीप्सार्थे[४२] - अर्थम् अर्थं प्रति = प्रत्यर्थम्
    iii) पदार्थानतिवृत्त्यर्थे - शक्तिम् अनतिक्रम्य = यथाशक्ति
    iv) सादृश्यार्थे - हरेः सादृश्यम् = सहरि
११. आनुपूर्व्यार्थे - ज्येष्ठस्य आनुपूर्व्येण = अनुज्येष्ठम्
१२. यौगपद्यार्थे - चक्रेण युगपत् = सचक्रम्
१३. सादृश्यार्थे[४३] - सख्या सदृशः = ससखि

---

४१. अव्ययं विभक्ति-समीप-समृद्धि-अर्थाभाव-अत्यय-असम्प्रति-शब्दप्रादुर्भाव-पश्चाद्-यथा-आनुपूर्व्य-यौगपद्य-सादृश्य-सम्पत्ति-साकल्य-अन्तवचनेषु -२.१.६,

४२. स्वपदविग्रहोऽयम् ।

४३. अत्र 'सदृश' इत्यर्थः विवक्षितः ।

१४. सम्पत्यर्थे[४४] - क्षत्राणां सम्पत्तिः = सक्षत्रम्
१५. साकल्यार्थे - तृणमपि अपरित्यज्य = सतृणम् (अत्ति)
१६. अन्तार्थे - अग्निग्रन्थपर्यन्तम् (अधीते) = साग्नि
१७. अवधारणार्थे[४५] - यावन्ति नामानि (तावन्तोऽच्युतप्रणामाः) = यावन्नामम् ।
१८. मर्यादार्थे[४६] - आ हिमालयात् = आहिमालयम् (चीनादेशः)
(मर्यादा = तेन विना)
१९. अभिविध्यर्थे - आ हिमालयात् = आहिमालयम् (भारतदेशः)
(अभिविधिः = तेन सह)
२०. आभिमुख्यार्थे[४७] - अग्निं प्रति = प्रत्यग्नि

४.४.२. अव्ययोत्तरपदः अव्ययीभावः

२१. मात्रार्थे[४८] - शाकस्य लेशः = शाकप्रति

४.४.३. अव्ययपदरहितः अव्ययीभावः

२२. तिष्ठद्गुप्रभृतयः[४९] - तिष्ठन्ति गावः यस्मिन् काले = तिष्ठद्गु
आयत्यः गावः यस्मिन् काले = आयतीगवम्
२३. पारेशब्दयुक्तः - [५०]गङ्गायाः पारे = पारेगङ्गम्
२४. मध्येशब्दयुक्तः - समुद्रस्य मध्ये = मध्येसमुद्रम् ।

---

४४. अनुरूपः आत्मभावः सम्पत्तिः । ऋद्धेः आधिक्यं समृद्धिः । अतः सम्पत्ति-समृद्ध्योः अत्र न पर्यायार्थता ।
४५. यावदवधारणे - २.१.८ - इयत्ता परिच्छेदे गम्ये यावद् इत्ययं समस्यते ।
४६. आङ्मर्यादाभिविध्योः - २.१.१३ - एतयोराङ् पञ्चम्यन्तेन वा समस्यते ।
४७. लक्षणेनाभिप्रती आभिमुख्ये - २.१.१४ - आभिमुख्यद्योतकौ अभिप्रती चिह्नवाचिना सह वा समस्येते ।
४८. सुप्प्रतिनामात्रार्थे - २.१.९ - लेशार्थे विद्यमानेन प्रतिना सुबन्तं समस्यते ।
४९. तिष्ठद्गुप्रभृतीनि च - २.१.१७ - एतानि निपात्यन्ते ।
५०. पारे मध्ये षष्ठ्या वा - २.२.१८ - पारमध्यशब्दौ षष्ठ्यन्तेन सह वा समस्येते ।

* * * *

पञ्चमं प्रकरणम्

५. इदमवधेयम्

५.१. परस्परान्वितयोः एव समासः । किन्तु ....

परस्परान्वितयोः पदयोः समासः भवति । किन्तु परस्परान्वयोऽस्तीति सर्वत्र समासो न भवति ।

यथा - ग्रामं गतवान् । अत्र परस्परान्वयः अस्ति । तथापि समासो न भवति । ग्रामगतवान् इति असाधुरेव । समासविधायकस्य सूत्रस्य अभावः अत्र कारणम् । अतः एकैकस्यापि समासस्य समासविधायकं सूत्रं भवत्येवेति ज्ञेयम् ।

५.२. 'यत्र यत्र विग्रहः तत्र तत्र समासः' इति न ।

यत्र यत्र विग्रहः वक्तुं शक्यते तत्र तत्र समासो भवति इति न मन्तव्यम् । यथा - राष्ट्रस्य अयं = राष्ट्रियः । अत्र राष्ट्रस्य अयमिति विग्रहः । राष्ट्रिय इति तु तद्धितवृत्तिः । अत एव वृत्त्यर्थावबोधकं वाक्यं विग्रहः इत्युक्तं, न तु समासार्थवबोधकं वाक्यं विग्रहः इति ।

५.३. कर्मधारयः द्विगुश्च तत्पुरुषभेदौ एव ।

तत्पुरुषः, द्वन्द्वः, अव्ययीभावः, बहुव्रीहिः चेति समासः चतुर्धा इत्येव शास्त्रीयः क्रमः । कर्मधारयः द्विगुः च तत्पुरुषे एव अन्तर्भवतः ।

५.४. 'यत्र यत्र पूर्वपदं सङ्ख्या तत्र तत्र द्विगुः' इति न ।

सङ्ख्यापूर्वः द्विगुः । किन्तु सङ्ख्यापूर्वकः समासः सर्वोऽपि न द्विगुः । **यथा** - पञ्चपुत्रः पाण्डुः । एषः बहुव्रीहिः । अनेकवद्भावी द्विगुरिति नास्ति । सप्तर्षय इति तु कर्मधारयः ।

५.५. सुबन्तयोरेव समासः ।

कुम्भं करोति इत्यादौ उपपदसमासस्य विग्रहे तिङन्तं श्रूयते, न तु समासे । अतः सुबन्ततिङन्तयोः न समासः ।

५.६. प्रथमान्तेन प्रथमं विग्रहः ।

कूपपतितेन आक्रुश्यते । कूपं पतितः = कूपपतितः । तेन कूपपतितेन । इत्येवं विग्रहः प्रदर्शनीयः, न तु कूपं पतितेन = कूपपतितेनेति । समासे कृते प्रथमान्तेन प्रथममुच्चारणीयम् । अनन्तरम् इष्टा विभक्तिः योजनीया । सर्वत्र समासे एषः क्रमः ।

५.७. कर्मधारये विग्रहः द्विप्रकारकः ।

नीलः मेघः = नीलमेघः, नीलश्चासौ मेघश्च = नीलमेघः - इति उभयथापि विग्रहः प्रदर्श्यते । अत्र प्रथमः प्रकारः आदृतः ।

५.८. अव्ययीभावे प्रायः विभक्तिश्रवाणं न ।

अव्ययीभावसमासे (अकारान्तम्, टच्प्रत्ययान्तं च विहाय) यथाशक्ति, प्रतिवधु, आकन्याकुमारि, प्रतिकार्यकर्तृ - इत्यादौ विभक्तेः श्रवणं न भवति । अतः यथाशक्तिः इति, यथाशक्तिम् इति वा न प्रयोक्तव्यम् ।

५.९. विधायकसूत्रम् अस्ति चेदेव समासः ।

गुरवे दक्षिणा = गुरुदक्षिणा इति विग्रहः न प्रदर्शनीयः । गुरोः दक्षिणा = गुरुदक्षिणा इति षष्ठीतत्पुरुषः एव । बलि-हित-सुख-रक्षित-शब्दैः सहैव चतुर्थ्यन्तं समस्यते, नान्यैः शब्दैः । (किन्तु कुण्डलाय हिरण्यं = कुण्डलहिरण्यम् इत्यादौ प्रकृतिविकृतिभावे, बालकाय अयं = बालकार्थः इत्यादौ अर्थशब्देन च समासः भवति ।)

५.१०. एकशेषः न समासः ।

(माता च पिता च) = पितरौ, (भ्राता च स्वसा च) = भ्रातरौ इत्यादौ कः समासः इति प्रश्नः नोचितः । यतः एकशेषः न समासः, अपि तु पृथक् वृत्तिरेव । किन्तु विग्रहः कथमिति प्रश्नः युक्तः एव । वृत्त्यर्थावबोधकं वाक्यं खलु विग्रहः ।

५.११. क्रियाविशेषणस्थले.....

'निर्दयं कथयति' इत्यादौ निर्दयम् इति क्रियाविशेषणम् । अस्य विग्रहः व्याख्यानादिषु इत्थं प्रदर्श्यते । यथा - निर्गता दया यस्मिन् कर्मणि तद्यथा भवति तथा = निर्दयम् इति । एतादृशं बहुव्रीहावेव अन्तर्भवति ।

५.१२. एकया वृत्त्या इष्टार्थे सिद्धे वृत्तिद्वयस्य कल्पनम्....

'लक्ष्मीनारायणस्वरूपौ वधूवरौ' इति **'लक्ष्मीनारायणस्वरूपिणौ** वधूवरौ' इति च प्रयुज्येते । अनयोर्द्वयोरपि साधुत्वम् अस्ति ।

यथा - i) लक्ष्मीनारायणयोः स्वरूपम् इव स्वरूपं ययोः तौ लक्ष्मीनारायणस्वरूपौ इति प्रथमवाक्ये बहुव्रीहिः ।

ii) लक्ष्मीनारायणयोः स्वरूपं = लक्ष्मीनारायणस्वरूपम् । लक्ष्मीनारायणस्वरूपम् अनयोः अस्ति इति लक्ष्मीनारायणस्वरूपिणौ इति द्वितीयवाक्ये विग्रहः । अत्र तत्पुरुषात् मतुबर्थे इन्प्रत्ययः कृतः ।

इत्थमेव दीर्घकेशः (दीर्घाः केशाः यस्य सः) दीर्घकेशी (दीर्घाः केशाः = दीर्घकेशाः, दीर्घकेशाः अस्य सन्तीति = दीर्घकेशी) इत्यादयः प्रयोगाः व्याख्यातव्याः ।

इदमत्र ज्ञेयम् - प्रथमवाक्ये एका एव वृत्तिः (समासः) अस्ति । द्वितीयवाक्ये वृत्तिद्वयम् (समासवृत्तिः + तद्धितवृत्तिः) आश्रितम् । अर्थस्तु न भिद्यते । किन्तु प्रथमवाक्ये प्रयुक्ते समस्तपदे लाघवमस्ति । अतः तादृशः प्रयोगः औचित्यमावहति । अतः एव वैयाकरणानां समयः अस्ति *'न कर्मधारयात् मत्वर्थीयः बहुव्रीहिश्चेदर्थप्रतिपत्तिकरः'* इति । एकया वृत्त्या इष्टार्थः लब्धश्चेत् तत्र वृत्तिद्वयं न कल्पनीयमिति वाक्यस्याभिप्रायः । किन्तु अस्य समयस्य अनित्यत्वाङ्गीकारात् पूर्वोक्तप्रयोगद्वयमपि समर्थ्यते ।

---

* कर्मधारयपदं वृत्तेः उपलक्षणम् ।

५.१३. अर्थवत् समासः

अर्थम् अनुसृत्य विग्रहवाक्यं वक्तव्यं, समासश्च निश्चेतव्यः । 'लोकनाथः' इत्यादौ द्वयोरर्थयोः प्रतीतिः सम्भवति । यथा -

i) लोकस्य नाथः = लोकनाथः (षष्टीतत्पुरुषः) = राजा इत्यर्थः ।

ii) लोकः नाथः यस्य सः = लोकनाथः (बहुव्रीहिः) भिक्षुकः इत्यर्थः ।

एतादृशस्थले प्रकरणं विशेष्यं वा परिशील्य विग्रहो वक्तव्यः । समस्तं पदं वाक्यस्य अवयवभूतं सदेव अभिप्रेतमर्थं बोधयति, न तु स्वतन्त्रतयेति तु न विस्मर्तव्यम् ।

५.१४. दीर्घे समस्तपदे विग्रहः

दीर्घे समस्तपदे त्रिचतुराणि, पञ्चषाणि, ततोऽप्यधिकानि अपि पदानि अन्तर्भूतानि भवन्ति । तत्र विग्रहः इत्थं प्रदर्शनीयः । यथा -

वागर्थप्रतिपत्तये = वाक् च अर्थः च - वागर्थौ

वागर्थयोः प्रतिपत्तिः - वागर्थप्रतिपत्तिः

तस्यै वागर्थप्रतिपत्तये ।

यथा वा -

प्रथमकक्ष्यापाठ्यपुस्तकम् = प्रथमा कक्ष्या - प्रथमकक्ष्या

पाठ्यं च तत् पुस्तकं च - पाठ्यपुस्तकम्

प्रथमकक्ष्यायाः पाठ्यपुस्तकं - प्रथमकक्ष्यापाठ्यपुस्तकम् ।

अतः युगपदेव सर्वैः पदैः समासो न वक्तव्यः, द्वन्द्वसमासं विना । (प्रथमपृष्ठे द्वितीया टिप्पणी अपि द्रष्टव्या ।)

५.१५. प्रादिसमासः तत्पुरुषः बहुव्रीहिश्चापि

प्रादिसमासः तत्पुरुषोऽप्यस्ति, बहुव्रीहिरपि ।

यथा - i) प्रादितत्पुरुषः - शोभनः जनः = सुजनः

प्रगतः आचार्यः = प्राचार्यः

मान्यम् अतिक्रान्तः = अतिमान्यः

ii) प्रादिबहुव्रीहिः - शोभनः गन्धः यस्य सः = सुगन्धिः
दुर्गता मेघा यस्य सः = दुर्मेघाः
निर्गता करुणा यस्मात् सः = निष्करुणः ।

अतः अर्थं परिशील्य सुक्ष्मेक्षिकया भेदोऽवगन्तव्यः ।

५.१६. नञ्समासोऽपि द्विधा

नञ्समासोऽपि द्विधा - नञ्तत्पुरुषः नञ्बहुव्रीहिश्चेति ।

यथा - i) नञ्तत्पुरुषः - न सन्देहः = असन्देहः
न विवादः = अविवादः

ii) नञ्बहुव्रीहिः - अविद्यमानः पुत्रः यस्य सः - अपुत्रः
अविद्यमानं धनं यस्य सः - अधनः

अतः अत्रापि अर्थमवगत्य विग्रहः वक्तव्यः ।

५.१७. समासः सर्वोऽपि विकल्पेन

समासः सर्वोऽपि विकल्पेन प्रवर्तते । (केचन नित्यसमासाः सन्ति । १५ पृष्ठे - २.५.३. पश्यन्तु ।) अतः 'रामः कृष्णश्च गच्छतः' इति, 'रामकृष्णौ गच्छतः' इति वा प्रयोक्तुं शक्यम् । एवमेव 'राज्ञः दूतः तिष्ठति' इति, 'राजदूतस्तिष्ठति' इति वा प्रयोक्तुं शक्यम् ।

५.१८. सन्धिसमासयोः भेदः

सन्धिः	समासः
❖ वर्णनिमित्तकः ।	❖ पदनिमित्तकः ।
❖ वर्णानां संहिता* स्यादेव । संहितायां सत्यां सन्धिः नित्यः ।	❖ समासे पदयोः पदानां वा परस्परान्वयः स्यादेव ।
❖ सन्धिः पदे पदमध्ये समासे च भवति ।	❖ सुबन्तयोः समासः ।
❖ क्वचिदेव पदमपि निमित्तत्वेन आश्रीयते । यथा - हरे + ए = हरये	❖ समासः विकल्पेन प्रवर्तते । (नित्यसमासस्थलात् ऋते)

(* संहितैकपदे नित्या, नित्या धातूपसर्गयोः । नित्या समासे, वाक्ये तु सा विवक्षामपेक्षते ।।)

* * *

६. समासे प्रक्रियाः

१. रमापतिः २. राजपुरुषः ३. पात्रेसमिताः ४. मेघश्यामः
५. हरिहरौ ६. कृष्णसखः ७. महाराजः ८. अराजा
९. यथाशक्ति १०. शाकप्रति

एतानि दश समस्तपदानि विविच्यन्ते । तथा हि –

६.१. रमापतिः । (पूर्वपदे उत्तरपदे च विभक्तिलोपः । ततः समस्तपदात् सुबुत्पत्तिः)

रमायाः पति इति लौकिकविग्रहः । रमा + ङस् + पति + स् इति अलौकिकविग्रहः । द्वयोरपि विभक्त्योः लोपः । ततः रमापति इति समस्तात्पदात् सुप्रत्ययः (रमापति + स्) भवति । रुत्वे विसर्गे च रमापतिः इति निष्पन्नं भवति । अत्र पूर्वपदे उत्तरपदे वा प्रक्रियासम्बन्धी कोऽपि विशेषः नास्ति, विभक्तिलोपमन्तरा । समासे जाते पुनः समस्तात्पदात् सुबुत्पत्तिः भवतीति सदा स्मरणीयम् ।

६.२. राजपुरुषः । (पूर्वपदे विशेषः)

राज्ञः पुरुषः इति लौकिकविग्रहः । राजन् + ङस् + पुरुष + स् इति अलौकिकविग्रहः । विभक्त्योः लोपे राजन्पुरुष इति स्थिते पूर्वपदे श्रूयमाणस्य नकारस्य लोपः । ततः सुबुत्पत्तौ राजपुरुष इति निष्पन्नं भवति । अत्र पूर्वपदे नकारलोपः जातः इति पूर्वपदे प्रक्रियासम्बन्धी विशेषोऽस्ति । एवमेव जगदीश इत्यादौ सन्ध्यादिकमपि भवति ।

६.३. पात्रेसमिताः (पूर्वपदे अलुक्)

पात्रे समिताः इति लौकिकविग्रहः । पात्र + ङि + समित + जस् इति अलौकिकविग्रहः । अत्र जस्प्रत्ययस्यैव लोपः, न तु ङिप्रत्ययस्य । अतः एषः अलुक्समासः इत्युच्यते । अत्र पूर्वपदे अलुगेव विशेषः ।

६.४. मेघश्यामः । (समासे प्राक्प्रयोगः कस्य पदस्य ?)

मेघ इव श्यामः इति लौकिकविग्रहः । मेघ + सु + श्याम + सु इति अलौकिकविग्रहः । विभक्त्योः लोपः । मेघश्यामः इति रूपसिद्धिः । अत्र मेघ इव श्याम इत्यर्थे श्याममेघ इति कुतो न भवति, यथा - व्याघ्र इव पुरुषः = पुरुषव्याघ्रः इति ? एतादृशः सन्देहः समासे बहुत्र भवति । तदा समासविधायकं सूत्रमेव शरणम् । 'मेघश्याम' इत्यत्र समासविधायकं सूत्रं ''उपमानानि सामान्यवचनैः - २.१.५५'' इति । अत्र सूत्रे उपमानानि इति प्रथमान्तं पदम् । तत् प्राक् प्रयोज्यमिति नियमः । एवञ्च समासविधायकशास्त्रे यत् प्रथमान्तम् अस्ति तत्पदबोध्यं पूर्वं प्रयोक्तव्यम् इत्यर्थः । अतः मेघश्याम इत्यत्र उपमानपदबोध्यं पदं 'मेघ' इति, सामान्यवचनपदबोध्यं 'श्याम' इति । सूत्रे 'उपमानानि' इति प्रथमान्तम् । 'सामान्यवचनैः' इति तृतीयान्तम् । अतः मेघपदमेव प्राक् प्रयोज्यम् । एवमेव सर्वत्र समासे व्यवस्था ज्ञेया ।

६.५. हरिहरौ (द्वन्द्वे [बहुव्रीहौ च] प्राक्प्रयोगः कस्य ?)

हरिश्च हरश्च इति लौकिकविग्रहः । हरि + सु + हर + सु इति अलौकिकविग्रहः । विभक्त्योः लोपे पुनः सुबुत्पत्तौ हरिहरौ इति । अत्र द्वयोरपि प्रथमान्तपदबोध्यत्वं सम्भवति । अत हरहरी इत्यपि प्राप्तम् । तदा घिसंज्ञकं (घि = इकारान्तम् उकारान्तं च प्रातिपदिकम्) प्राक्प्रयोज्यमित्यर्थ-प्रतिपादकं 'द्वन्द्वे घि - २.२.३२' इति सूत्रं प्रवृत्तम् । अतः द्वन्द्वे विशेषसूत्रैः पूर्वपदव्यवस्था क्वचित् ज्ञेया । एवमेव बहुव्रीहौ अपि ।

६.६. कृष्णसखः । (उत्तरपदे विशेषः)

कृष्णस्य सखा इति लौकिकः विग्रहः । कृष्ण + ङस् + सखि + सु इति अलौकिकविग्रहः । विभक्त्योः लोपे कृष्णसखि इति भवति । 'राजाहःसखिभ्यष्टच् - ५.४.९१' इति सूत्रेण टच् (अ) प्रत्यये [कृष्णसखि + अ (टच्)] इकारस्य लोपे च कृते सुबुत्पत्तौ

कृष्णसखः इति निष्पद्यते । अत्र उत्तरपदे विकारः जातः । सः समासान्तप्रत्ययनिमित्तः । अतः सर्वेषु समासेषु (तत्पुरुषे, बहुव्रीहौ, द्वन्द्वे, अव्ययीभावे च) क्वचित् उत्तरपदस्य विकारो जायते ।

६.७. महाराजः (पुर्वोत्तरपदयोः विशेषः)

महान् राजा इति लौकिकविग्रहः । महत् + सु + राजन् + सु इति अलौकिकविग्रहः । विभक्त्योः लोपे 'महत्राजन्' इति भवति । 'आन्महतः समानाधिकरणजातीययोः - ६.३.४३' इति सूत्रेण महतः तकारस्य आत्वे (मह + आ + राजन्) सवर्णदीर्घे महाराजन् इति भवति । टच्प्रत्यये च कृते सुबुत्पत्तौ महाराज इति निष्पद्यते । अत्र पूर्वेत्तरयोः द्वयोरपि पदयोः प्रक्रियाविशेषः विद्यते ।

५.८. अराजा (समासान्तस्य क्वचित् निषेधः)

न राजा इति लौकिकः विग्रहः । न + राजन् + सु इति अलौकिकविग्रहः । विभक्त्योः लोपे 'नलोपो नञः - ६.३.७३' इति सूत्रेण नकारस्य(न्) लोपे पुनः सुबुत्पत्तौ अराजा इति निष्पद्यते । अत्र 'राजाहःसखिभ्यष्टच्' इति सूत्रेण विधीयमानः टच् न प्रवृत्तः । 'नञस्तत्पुरुषात् - ५.४.७१' इति टचः निषेधात् । अतः समासान्तस्यापि क्वचित् निषेधोऽस्ति ।

६.९. यथाशक्ति । (पूर्वपदविषये अस्वपदविग्रहः)

शक्तिम् अनतिक्रम्य इति लौकिकविग्रहः । शक्ति + अम् + यथा + इति अलौकिकविग्रहः । विभक्त्योः लोपः । यथा इत्यस्य पूर्वोपस्थितिः । पुनः सुबुत्पत्तौ यथाशक्ति + सु इति जाते 'अव्ययादाप्सुपः - २.४.८२' इति पुनः सुप्रत्यस्य लोपे यथाशक्ति इति निष्पद्यते । अत्र लौकिकविग्रहे अनतिक्रम्य इति श्रूयते । अलौकिकविग्रहे तु यथा इति । अतः समासः यथा इत्यस्य शक्ति इत्यनेनैव, न तु अनतिक्रम्य इति पदेन सह । नित्यसमासे सर्वत्र एषा गतिरेव । एवञ्च अत्र पूर्वपदविषये स्वपदविग्रहो नास्तीति तात्पर्यम् ।

गतिरेव । एवञ्च अत्र पूर्वपदविषये स्वपदविग्रहो नास्तीति तात्पर्यम् ।

६.१०. शाकप्रति । (उत्तरपदविषये अस्वपदविग्रहः)

शाकस्य लेशः इति लौकिकविग्रहः । शाक + ङस् + प्रति + सु इति अलौकिकविग्रहः । विभक्तेः लोपः । पुनः सुबुत्पत्तिः लोपश्च । शाकप्रति इति निष्पद्यते । अत्रापि प्रति इत्यनेनैव सह समासः, न तु लेशपदेन सह । एषः अपि नित्यसमासः । अतः अत्र उत्तरपदविषये स्वपदविग्रहो नास्ति ।

पूर्वोक्तानाम् एष सङ्ग्रहः

१. पूर्वोत्तरपदयोः प्रक्रियाविशेषः क्वचित् नास्ति । यथा - रमापतिः ।

२. पूर्वपदे नकारलोपादिकं, अलुक्त्वं प्राक्प्रयोज्यत्वं च सम्भवति । यथा - राजपुरुषः, पात्रेसमिताः, हरिहरौ च ।

३. उत्तरपदे समासान्तत्वं, समासान्तनिषेधश्च सम्भवतः । यथा - कृष्णसखः, अराजा ।

४. पूर्वोत्तरयोः द्वयोरपि प्रक्रियाविशेषः भवति । यथा - महाराजः ।

५. लौकिकविग्रहे क्वचित् पूर्वपदं, क्वचित् उत्तरपदम् अन्यत् श्रूयते । यथा - उपकृष्णम्, शाकप्रति ।

* * *

७. अभ्यासाः

अभ्यासः - १

अधोनिर्दिष्टानां विग्रहवाक्यानाम् आधारेण समस्तपदानि लिखन्तु ।

(अ) १. भगवन्तं श्रितः = ...
२. पाणिनिना लिखितम् = ...
३. भोजनाय अयम् = ...
४. तृप्तये इयम् = ...
५. क्रीडायां निपुणः = ...
६. शास्त्रिणः पुस्तकम् = ...
७. शर्मणः गृहम् = ...
८. धनिनाम् आवासः = ...
९. वर्मणः शौर्यम् = ...
१०. करिणां वृन्दम् = ...
११. घनपाठिनः कण्ठश्रीः = ...
१२. त्रिपाठिनः अध्यापनम् = ...
१३. महिम्नः वर्णनम् = ...
१४. अप्सरसां गणः = ...
१५. चन्द्रमसः दर्शनम् = ...

(आ) १. पुरुषः पुङ्गवः इव = ...
२. छायाप्रधानः तरुः = ...
३. दध्ना अन्नम् = ...
४. शास्त्री + महोदयः = ...
५. शर्मा + महोदयः = ...

६. वर्मा + महोदयः =..............................

७. त्रिपाठी + वर्यः =..............................

८. दूर्वासाः + मुनिः =..............................

९. महत् + दुःखम् =..............................

१०. महत् + पुण्यम्, तेन =..............................

(इ) १. सर्वा + रात्रिः =..............................

२. शुभा + रात्रिः =..............................

३. पुण्या + रात्रिः =..............................

४. दीर्घाः + रात्रयः =..............................

५. त्रयाणां रात्रीणां समाहारः =..............................

६. पश्चिमा + रात्रिः =..............................

७. शिवा + रात्रिः =..............................

८. सङ्ख्याता + रात्रिः =..............................

९. अतिक्रान्तः + रात्रिम् =..............................

१०. मङ्गला + रात्रिः =..............................

(ई) १. अमराणां राजा =..............................

२. कुत्सितः राजा =..............................

३. न राजा =..............................

४. श्रेष्ठः राजा =..............................

५. चन्द्रगुप्तः इति राजा =..............................

६. न + पन्थाः =..............................

७. कृष्णस्य सखा =..............................

८. श्रेष्ठः + सखा =..............................

९. न + सखा =..............................

१०. अतिशयितः राजा =..............................

(उ) १. गृहीतः वृक्षः येन सः =..................................

२. गृहीतः वृक्षः यया सा =..................................

३. गृहीता लता येन सः =..................................

४. गृहीतं तात्पर्यं यया सा =..................................

५. गृहीता भक्तिः येन सः =..................................

६. गृहीता धेनुः येन सः =..................................

७. गृहीता दासी यया सा =..................................

८. गृहीता श्वश्रूः यया सा =..................................

९. गृहीतं नाम येन सः =..................................

१०. गृहीतं पयः येन सः =..................................

अभ्यासः - २

अधः कानिचन विग्रहवाक्यानि दत्तानि सन्ति । तदाधारेण समस्तपदानि लिखन्तु । समासनाम अपि लिखतु ।

१. सालः इति वृक्षः =..................(......................)

२. भोजः इति राजा =..................(......................)

३. विजयनगरस्य राजा =................(......................)

४. चन्द्रसेनः इति राजा =................(......................)

५. दशानाम् अध्यायानां समाहारः =...........(.................)

६. अतिक्रान्तः मानवम् =................(......................)

७. आभरणं करोति इति =................(......................)

८. वीणा पाणौ यस्याः सा =.............(......................)

९. पञ्च वा षड् वा =......................(......................)

१०. न धनम् =......................(............................)

११. अविद्यमानं धनं यस्य सः =............(....................)

१२. न आदरः =.......................(...........................)

१३. श्रेष्ठा भाषा =......................(......................)
१४. जीवन्ती भाषा =....................(......................)
१५. महती वेदना =......................(......................)
१६. महान् आढ्यः =....................(......................)
१७. पिता च भ्राता च =.................(......................)
१८. मध्यं रात्रेः =......................(......................)
१९. श्रुता कथा येन सः =.................(.................)
२०. अन्या कथा =......................(......................)

अभ्यासः - ३

अधोनिर्दिष्टेषु वाक्येषु स्थूलाक्षरैः सूचितानां समस्तपदानाम् विग्रहवाक्यानि लिखन्तु -

१. गोपालः **पीतक्षीरं** वत्सं बध्नाति । (........................)
२. अष्टमकक्ष्यायां **द्वित्राः** छात्राः अनुत्तीर्णाः । (..................)
३. भक्ताः **पीताम्बरं** विष्णुं नमस्कृतवन्तः । (.....................)
४. एषः अस्मिन् ग्रामे निवसति । सः **ग्रामान्तरे** निवसति । (......)
५. **उपग्रामम्** अरण्यम् अस्ति । (................................)
६. सेवकः सर्वदा **यथादेशं** कार्यं करोति । (.....................)
७. एषः **प्रश्नातीतः** विषयः । (................................)
८. **महर्षयः** अरण्येषु निवसन्ति स्म । (.........................)
९. **हरिणनेत्रा** सा सुन्दरी अस्ति । (..........................)
१०. **नागवेणिः** तरुणी मार्गे गच्छति । (.........................)
११. एषः महोदयः मम **पितृसमः** अस्ति । (....................)
१२. वैद्यः **पूर्वाह्णे** चिकित्सालये भवति । (.....................)
१३. **नवरात्रे** जनाः सरस्वत्याः पूजां कुर्वन्ति । (.................)
१४. अद्य मार्गे **हस्ताहस्ति** प्रवृत्तम् । (...........................)

१५. रामः वनवाससमये **पञ्चवट्यां** निवसति स्म । (..............)
१६. निर्धनः **दुःखाग्निना** दह्यमानः अस्ति । (....................)
१७. **दशाननं** रावणं रामः संहृतवान् । (.......................)
१८. अस्माकं **प्राचार्यः** अद्य न आगतवान् । (...................)
१९. अद्य कार्यक्रमे **दशद्वादशाः** जनाः आसन् । (................)
२०. **सपत्नीकः** सः चलनचित्रं द्रष्टुं गतवान् । (.................)

अभ्यासः -४

अधः दत्तानां विग्रहवाक्यानाम् आधारेण समस्तपदानि लिखन्तु ।

उदा — वृक्षस्य समीपे (उप) = उपवृक्षम्

१. विद्यालयस्य सपीपे (उप) =................................ ।
२. पाठशालायाः समीपे (उप) =............................... ।
३. वञ्चनायाः अभावः (निर्) =............................... ।
४. बुद्धेः योग्यम् (अनु) =..................................... ।
५. पारे नद्याः =.. ।
६. मध्ये सरस्वत्याः =... ।
७. गुरुम् अभि =.. ।
८. आ हिमगिरेः =... ।
९. आ कन्याकुमार्याः =... ।
१०. आज्ञाम् अनतिक्रम्य (यथा) =............................. ।
११. नीतिम् अनतिक्रम्य (यथा) =.............................. ।
१२. वीथीं वीथीं प्रति =.. ।
१३. बन्धूनां समीपे (उप) =..................................... ।
१४. मातुः समीपे (उप) =.. ।
१५. महिलां महिलां प्रति =....................................... ।

१६. दध्नः अभावः (निर्) - .... ।

१७. मालत्याः योग्यम् (अनु) - .... ।

१८. सूचनाम् अनतिक्रम्य (यथा) - .... ।

१९. मध्ये सभायाः - .... ।

२०. शोभायात्राम् अभि - .... ।

अभ्यासः - ५

संस्कृतसम्मेलनावसरे –

१. प्रसादः धनं सङ्गृहीतवान् ।

२. प्रह्लादः वेदिकाम् अलङ्कृतवान् ।

३. माला पदकानि निर्मितवती ।

४. सुधीरः गणनां लिखितवान् ।

५. संयोजकः गोष्ठीं निरूढवान् ।

६. निर्देशकः कार्यकर्तॄन् प्रेरितवान् ।

७. बालिकाः वीथीः अलङ्कृतवत्यः ।

८. वरदा पुस्तकानि विक्रीतवती ।

९. मङ्गला रङ्गवल्लीः लिखितवती ।

१०. विद्या मुरलीं वादितवती ।

११. मोहनः वीणां वादितवान् ।

१२. सुरेशः अतिथीन् अभिनन्दितवान् ।

१३. चन्द्रः (अध्यक्षाय) मालाम् अर्पितवान् ।

१४. उद्घाटकः भारतमातरम् अर्चितवान् ।

१५. वेङ्कटेशः शोभायात्रां व्यवस्थापितवान् ।

पूर्वं निर्दिष्टानां वाक्यानाम् आधारेण कः कीदृशः इति बहुव्रीहिघटितपदेन सूचयन्तु । प्रथमं विग्रहवाक्यं लिखित्वा ततः समस्तं पदं लिखन्तु ।

उदा – १. सङ्गृहीतं धनं येन सः = सङ्गृहीतधनः (प्रसादः)

२. .... =........................ (प्रह्लादः)
३. .... =........................ (माला)
४. .... =........................ (सुधीरः)
५. .... =........................ (संयोजकः)
६. .... =........................(निर्देशकः)
७. .... =........................ (बालिकाः)
८. .... =........................ (वरदा)
९. .... =........................ (मङ्गला)
१०. .... =........................ (विद्या)
११. .... =........................ (मोहनः)
१२. .... =........................ (सुरेशः)
१३. .... =........................ (चन्द्रः)
१४. .... =........................ (उद्घाटकः)
१५. .... =........................ (वेङ्कटेशः)

अभ्यासः – ६

रामकृष्णः कश्चन विद्यार्थी । सः समासादिकं न जानाति । किन्तु तस्य इच्छा यत् मनसि विद्यमानः भावः बहुव्रीहिसमासेन प्रकाशनीयः इति । रामकृष्णस्य अपेक्षाः अधः निर्दिष्टाः सन्ति । भवन्तः समस्तम् एकं पदं सूचयन्तः तस्य विग्रहम् अपि ज्ञापयन्तः तस्य साहाय्यं कुर्वन्तु ।

उदा – अनुजः पुस्तकं स्वीकृतवान् । अतः अनुजः——————— स्वीकृतपुस्तकः (स्वीकृतं पुस्तकं येन सः)

१. रामः विद्याम् अधीतवान् । अतः रामः .... ।
२. वृक्षे बह्व्यः शाखाः सन्ति । अतः वृक्षः .... ।
३. रावणः सीताम् अपहृतवान् । अतः रावणः .... ।
४. बालिका मालाः धृतवती अस्ति । अतः बालिका .... ।
५. रामस्य पत्नी सीता । अतः रामः.. ।
६. श्रीशः भगिनीम् आहूतवान् । अतः श्रीशः .... ।
७. एतस्मिन् ग्रामे अनेके कार्यकर्तारः सन्ति । अतः एष ग्रामः

.... ।

८. विष्णुः लक्ष्मीं प्राप्तवान् । अतः विष्णुः .... ।
९. जनाः धर्मं पालितवन्तः । अतः जनाः .... ।
१०. गृहे बह्व्यः वध्वः सन्ति । अतः गृहम् .... ।
११. खाद्यस्य गन्धः दुष्टः (दुर्) अस्ति । अतः खाद्यम् .... ।
१२. तैलस्य गन्धः शोभनः (सु) अस्ति । अतः तैलम् .... ।
१३. गोपालः गाः पालितवान् । अतः गोपालः .... ।
१४. जगदीशः चन्दमामां पठितवान् । अतः जगदीशः .... ।
१५. अरुणः कथाः कण्ठस्थीकृतवान् । अतः अरुणः................ ।

अभ्यासः -७

अधः विग्रहवाक्यानि दत्तानि सन्ति । एकैकस्य विग्रहवाक्यस्य पुरतः त्रीणि रूपाणि दत्तानि सन्ति । तेषु एकम् एव शुद्धम् । तत् चित्वा रिक्तस्थाने लिखन्तु ।

१. अन्या माला = ...
(१. मालान्तरम्, २. मालान्तरा, ३. मालान्तरः)

२. निष्क्रान्तः वाराणस्याः = ...
(१. निर्वाराणसः, २. निर्वाराणसिः, ३. निर्वाराणसम्)

३. त्रयः वा चत्वारः वा – ....
(१. त्रिचत्वारि, २. त्रिचतुराः, ३. त्रिचतुरः)

४. मुष्टिभिः मुष्टिभिः प्रहृत्य इदं युद्धं प्रवृत्तम् इति – ....
(१. मुष्टीमुष्टि, २. मुष्टामुष्टि, ३. मुष्टीमुष्टिः)

५. मतिम् अनतिक्रम्य – ....
(१. यथामतिः, २. यथामति, ३. यथामतिम्)

६. मध्ये कपिलायाः – ....
(१. मध्येकपिलाम्, २. मध्येकपिलः, ३. मध्येकपिलम्)

७. पिता च पितृव्यः च – ....
(१. पितृपितृव्यौ, २. पितापितृव्यौ, ३. पितः पितृव्यौ)

८. महत् ज्ञानं यस्य सः – ....
(१. महाज्ञानम्, २. महाज्ज्ञानः, ३. महाज्ञानः)

९. दीर्घाः केशाः यस्य सः – ....
(१. दीर्घकेशी, २. दीर्घकेशः, ३. दीर्घकेशाः)

१०. पूर्वं रात्रेः – ....
(१. पूर्वरात्रिः, २. पूर्वरात्रम्, ३. पूर्वरात्रः)

अभ्यासः -८

अधः कानिचन वाक्ययुगलानि सन्ति । युगलस्थे वाक्यद्वये अपि एकं समस्तपदम् उपयुक्तम् । तादृशानां समस्तपदानाम् अर्थं सम्यक् अवगत्य विग्रहवाक्यं लिखन्तु ।

उदा - I (अ) संन्यासिनी सदा **श्वेताम्बरं** धरति । (श्वेतम् अम्बरम्)
(आ) **श्वेताम्बरा** बालिका अप्सराः इव शोभते ।
(श्वेतम् अम्बरं यस्याः सा)

II (अ) **अकार्यं** किमर्थं करोति भवान् ? (..................)
(आ) **अकार्यः** अलसः तूष्णीं तिष्ठति । (..................)

III (अ) **दीर्घहस्तः** व्याधः अरण्यं गतवान् । (...................)

(आ) व्याधः **दीर्घहस्तं** प्रसार्य शुकं गृहीतवान् । (............)

IV (अ) **आकर्णाटकसीमं** कन्नडभाषा अस्ति । (.................)

(आ) तमिळुभाषा **आकर्णाटकसीमम्** अस्ति । (...............)

V (अ) **विद्याधनं** सर्वधनप्रधानम् अस्ति । (.......................)

(आ) **विद्याधनः** पण्डितः सर्वत्र पूज्यते । (.....................)

VI (अ) **लोकनाथः** राजा धर्मेण राज्यं पालयति । (...............)

(आ) **लोकनाथः** भिक्षुकः भिक्षायाचनं करोति । (.............)

VII (अ) **शीतलच्छाया** कस्य सन्तोषाय न भवति ? (.............)

(आ) **शीतलच्छायं** वृक्षं सर्वे आश्रयन्ति । (...................)

अभ्यासः - ९

अधोनिर्दिष्टेषु शब्देषु कश्चन समाससम्बद्धः व्याकरणविशेषः अस्ति । शब्दानां विग्रहवाक्यं लिखित्वा व्याकरणविशेषम् अपि निर्दिशन्तु ।

समस्तपदम्	*विग्रहवाक्यम्*	*समासनाम*	*व्याकरणविशेषः*
उदा - पञ्चरात्रम्	पञ्चानां रात्रीणां समाहारः	द्विगुः	रात्रिशब्दः, अकारान्तः जातः, नपुसंकलिङ्गः च ।
१. महायोजना	....	....	....
२. अहोरात्रः	....	....	....
३. यक्षराजः	....	....	....
४. क्रीतमालाकः	....	....	....
५. पुष्पस्त्रजम् (द्वन्द्वः)	....	....	....

६. उत्तमगवी	....	....	....
७. चतुष्पात्	....	....	....
८. सप्ताहः	....	....	....
९. अराजा	....	....	....
१०. बहुकर्तृकम्	....	....	....
११. उपचन्द्रशालम्	....	....	....
१२. अध्यात्मम्	....	....	....
१३. दीर्घपथः	....	....	....
१४. सुगन्धिः	....	....	....
१५. मातादुहितरौ	....	....	....
१६. अतिरात्रः	....	....	....
१७. यथाकर्मम्	....	....	....
१८. लोकसखः	....	....	....
१९. रमाजानिः	....	....	....
२०. महाबलः	....	....	....

अभ्यासः - १०

अधोनिर्दिष्टानां वाक्यानां समस्तपदेषु दोषाः सन्ति । दोषयुक्तं समस्तपदं स्थूलाक्षरैः निर्दिष्टम् अस्ति । तत्र युक्तं पदं लिखन्तु ।

१. एतादृशः जनः **त्रिलोके** अपि कोऽपि नास्ति ।

२. अद्यतनगोष्ठ्यां **द्वित्रिजनाः** आसन् ।

३. मम विद्यालये **उपविंशतयः** अध्यापकाः सन्ति ।

४. बालकः **पाणिपादान्** प्रक्षाल्य भोजनार्थं गतवान् ।

५. कार्यसिद्ध्यर्थम् अहं **यथाशक्तिः** प्रयत्नं करोमि ।

६. **स्वामीविवेकानन्देन** उक्तम् - 'उत्तिष्ठत, जाग्रत' इति ।

७. **गुप्तराज्ञां** शासनकालः स्वर्णयुगम् इति उच्यते ।

८. कर्णाटकस्थे कोलारप्रदेशे **महत्परिमाणेन** सुवर्णं लभ्यते ।

९. त्रिविक्रमः **मध्यरात्रौ** अपि विना भीतिं गतवान् ।

१०. **नवरात्र्युत्सवे** जनाः सन्तोषेण भवन्ति ।

११. **भवत्सखा** कृष्णः अद्य मिलितः आसीत् ।

१२. एषा **उत्तमगौः** भवता कुत्र क्रीता ?

१३. प्रजानां हितम् अचिन्तयन् एषः **अराजः** एव ।

१४. **ज्ञातधर्मः** अपि दुर्योधनः धर्ममार्गं न अनुसरति स्म ।

१५. कक्ष्यायाम् **उपमङ्गलाम्** उमा उपविशति ।

* * *

उत्तराणि

अभ्यासः - १ १. (अ) १. भगवच्छ्रितः । २. पाणिनिलिखितम् । ३. भोजनार्थः । ४. तृप्त्यर्थः । ५. क्रीडानिपुणः । ६. शास्त्रिपुस्तकम् । ७. शर्मगृहम् । ८. धन्यावासः । ९. वर्मशौर्यम् । १०. करिवृन्दम् । ११. घनपाठिकण्ठश्रीः । १२. त्रिपाठ्यध्यापनम् । १३. महिमवर्णनम् । १४. अप्सरोगणः १५. चन्द्रमोदर्शनम् ।

(आ) १. पुरुषपुङ्गवः । २. छायातरुः ३. दध्यन्नम् । ४. शास्त्रिमहोदयः । ५. शर्ममहोदयः । ६. वर्ममहोदयः । ७. त्रिपाठिवर्यः । ८. दूर्वासोमुनिः । ९. महादुःखम् । १०. महापुण्येन ।

(इ) १. सर्वरात्रः २. शुभरात्रिः । ३. पुण्यरात्रः । ४. दीर्घरात्रयः । ५. त्रिरात्रम् । ६. पश्चिमरात्रः । ७. शिवरात्रिः। ८. सङ्ख्यातरात्रः । ९. अतिरात्रः । १०. मङ्गलरात्रिः ।

(ई) १. अमरराजः । २. किंराजा । ३. अराजा । ४. श्रेष्ठराजः । ५. चन्द्रगुप्तराजः । ६. अपन्थाः/अपथम् । ७. कृष्णसखः ८. श्रेष्ठसखः । ९. असखा । १०. अतिराजा ।

(उ) १. गृहीतवृक्षः । २. गृहीतवृक्षा । ३. गृहीतलतः । ४. गृहीततात्पर्यार्था । ५. गृहीतभक्तिः । ६. गृहीतधेनुः । ७. गृहीतदासीका । ८. गृहीतश्वश्रूका । ९. गृहीतनामा । (नकारान्तः) १०. गृहीतपयाः (सकारान्तः)

अभ्यासः - २ १. सालवृक्षः - सम्भावनापूर्वपदः । २. भोजराजः - सम्भावना-पूर्वपदः । ३. विजयनगरराजः - षष्ठीतत्पुरुषः । ४. चन्द्रसेनराजः - सम्भावनापूर्वपदः । ५. दशाध्यायी - समाहारद्विगुः । ६. अतिमानवः - प्रादिसमासः । ७. आभरणकारः - उपपदसमासः । ८. वीणपाणिः - व्यधिकरणबहुव्रीहिः । ९. पञ्चषाः - सख्योभयपदः बहुव्रीहिः । १०. अधनम् - नञ्समासः । (तत्पुरुषः) ११. अधनः - नञ्बहुव्रीहिः । १२. अनादरः - नञ्तत्पुरुषः । १३. श्रेष्ठभाषा - विशेषणपूर्वपदः कर्मधारयः । १४. जीवद्भाषा-विशेषणपूर्वपदः कर्मधारयः । १५. महावेदना - विशेषणपूर्वपदः कर्मधारयः । १६. महाढ्यः - विशेषणपूर्वपदः कर्मधारयः । १७. पिताभ्रातरौ - द्वन्द्वसमासः । १८. मध्यरात्रः - प्रथमातत्पुरुषः । १९. श्रुतकथः - तृतीयार्थबहुव्रीहिः । २०. कथान्तरम् - मयूरव्यंसकादिकर्मधारयः ।

अभ्यासः - ३ १. पीतं क्षीरं येन सः । तम् । २. द्वौ वा त्रयः वा । ३. पीतम् अम्बरं यस्य सः । तम् । ४. अन्यः ग्रामः । तस्मिन् । ५. ग्रामस्य समीपे । ६. आदेशम्

अनतिक्रम्य । ७. प्रश्नम् अतीतः । ८. महान्तः ऋषयः । ९. हरिणस्य नेत्रे इव नेत्रे यस्याः सा । १०. नाग इव वेणी यस्याः सा । ११. पित्रा समः । १२. अह्नः पूर्वम् । तस्मिन् । १३. नवानां रात्रीणां समाहारः । तस्मिन् । १४. हस्तैः हस्तैः प्रहृत्य इदं युद्धं प्रवृत्तम् इति । १५. पञ्चानां वटानां समाहारः । तस्याम् । १६. दुःखम् एव अग्निः । तेन । १७. दश आननानि यस्य सः । तम् । १८. प्रगतः आचार्यः । १९. दश वा द्वादश वा । २०. पत्न्या सह वर्तते इति ।

अभ्यासः - ४ १. उपविद्यालयम् । २. उपपाठशालम् । ३. निर्वञ्चनम् । ४. अनुबुद्धि । ५. पारेनदि । ६. मध्येसरस्वति । ७. अभिगुरु । ८. आहिमगिरि । ९. आकन्याकुमारि । १०. यथाज्ञम् । ११. यथानीति । १२. प्रतिवीथि । १३. उपबन्धु । १४. उपमातृ । १५. प्रतिमहिलम् । १६. निर्दधि । १७. अनुमालति । १८. यथासूचनम् । १९. मध्येसभम् । २०. अभिशोभायात्रम् ।

अभ्यासः - ५ १. सङ्गृहीतधनः । २. अलङ्कृतवेदिकः । ३. निर्मितपदका । ४. लिखितगणनः । ५. निरूढगोष्ठीकः । ६. प्रेरितकार्यकर्तृकः । ७. अलङ्कृतवीथीकाः । ८. विक्रीतपुस्तका । ९. लिखितरङ्गवल्लीका । १०. वादितमुरलीका । ११. वादितवीणः । १२. अभिनन्दितातिथिः । १३. अर्पितमालः । १४. अर्चितभारतमातृकः । १५. व्यवस्थापितशोभायात्रः ।

अभ्यासः - ६ १. अधीतविद्यः । अधीता विद्या येन सः । २. बहुशाखः । बह्व्यः शाखाः यस्मिन् सः । ३. अपहृतसीतः । अपहृता सीता येन सः । ४. धृतमाला । धृता माला यया सा । ५. सीतापत्नीकः । सीता पत्नी यस्य सः । ६. आहूतभगिनीकः । आहूता भगिनी येन सः । ७. अनेककार्यकर्तृकः । अनेके कार्यकर्तारः यस्मिन् तत् । ८. प्राप्तलक्ष्मीकः । प्राप्ता लक्ष्मीः येन सः । ९. पालितधर्माणः । पालितः धर्मः यैः ते । १०. बहुवधूकं गृहम् । बह्व्यः वध्वः यस्मिन् तत् । ११. दुर्गन्धम् । दुष्टः (दुर्) गन्धः यस्य तत् । १२. सुगन्धि । शोभनः (सु) गन्धः यस्य तत् । १३. पालितगुः । पालिताः गावः येन सः । १४. पठितचन्दमामः । पठिता चन्दमामा येन सः । १५. कण्ठस्थीकृतकथः । कण्ठस्थीकृताः कथाः येन सः ।

अभ्यासः - ७ १. मालान्तरम् । २. निर्वाराणसिः । ३. त्रिचतुराः । ४. मुष्टीमुष्टि । ५. यथामति । ६. मध्येकपिलम् । ७. पितृपितृव्यौ । ८. महाज्ञानः । ९. दीर्घकेशः । १०. पूर्वरात्रः ।

अभ्यासः - ८ II (अ) न कार्यम् । (आ) अविद्यमानं कार्यं यस्य सः ।
III (अ) दीर्घः हस्तः यस्य सः । (आ) दीर्घः हस्तः ।

IV (अ) आ कर्णाटकसीमायाः । (अभिविध्यर्थे)
(आ) आ कर्णाटकसीमायाः (मर्यादार्थे)
V (अ) विद्या एव धनम् । (आ) विद्या धनं यस्य सः ।
VI (अ) लोकस्य नाथः । (आ) लोकः नाथः यस्य सः ।
VII (अ) शीतला छाया । (आ) शीतला छाया यस्य सः ।

अभ्यासः - ९ १. महती योजना । कर्मधारयः । महतः आकारः । २. अहश्च रात्रिश्च । द्वन्द्वः । रात्रिशब्दः अकारान्तः पुंल्लिङ्गः च । ३. यक्षाणां राजा । तत्पुरुषः । राजशब्दः अकारान्तः । ४. क्रीता माला येन सः । बहुव्रीहिः । अकारान्तः । ५. पुष्पं च स्त्रक् च । द्वन्द्वः । अकारान्तः नपुंसकलिङ्गः च । ६. उत्तमा गौः । तत्पुरुषः । स्त्रीलिङ्गे ईकारान्तः । ७. चत्वारः पादाः यस्य सः । बहुव्रीहिः । अकारान्तः पुंल्लिङ्गः च । ८. सप्तानाम् अह्नां समाहारः । द्वन्द्वः । अकारान्तः नपुंसकलिङ्गः च । ९.न राजा । तत्पुरुषः । अकारान्तनिषेधः । १०. बहवः कर्तारः यस्मिन् तत् । बहुव्रीहिः । कप्प्रत्ययः । ११. चन्द्रशालायाः समीपे । अव्ययीभावः । अकारान्तः । १२. आत्मनि इति । अव्ययीभावः । अकारान्तः । १३. दीर्घः पन्थाः । कर्मधारयः । अकारान्तः । १४. शोभनः गन्धः यस्य सः। बहुव्रीहि । इकारान्तः । १५. माता च दुहिता च । द्वन्द्वः । मातृशब्दस्य आकारन्तत्वम् । १६. रात्रिम् अतिक्रान्तः । प्रादिसमासः (तत्पुरुषः) । रात्रेः अकारान्तत्वम् । १७. कर्माणि अनतिक्रम्य । अव्ययीभावः । अकारान्तनपुंसकलिङ्गः । १८.लोकस्य सखा । तत्पुरुषः । अकारान्तः । १९. रमा जाया यस्य सः । बहुव्रीहिः । जायाशब्दस्य निङ् - आदेशः । २०. महत् बलं यस्य सः । बहुव्रीहिः । महतः आत्वम् ।

अभ्यासः - १० १. त्रिलोक्याम् । २. द्वित्रजनाः । ३. उपविंशाः ४. पाणिपादम् । ५. यथाशक्ति । ६. स्वामिविवेकानन्देन । ७. गुप्तराजानाम् । ८. महापरिमाणेन । ९. मध्यरात्रे । १०. नवरात्रोत्सवे । ११. भवत्सखः । १२. उत्तमगवी । १३. अराजा । १४. ज्ञातधर्मा । १५. उपमङ्गलम् ।

******